CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 112.

Title 'SIGHRABODHA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 112 Subject: Jyotiṣ

Title: Śīghrabodha.

Author: Kāśinātha Scribe: Devlekar

Date of the work: — Date of the Ms.: Śaṃ. 128

Place of the work: — Place of the Ms.: Bombay

Size: 12.6" by 4.9" Extent: 30 foll.

Language: Sanskrit. Script: Devanāgarī.

Remarks: Complete. Stone printed.

अथशीघ्रबोधप्रारभ्यते·



श्रीगणेशायनमः॥ ॥श्रीमतेरामानुजायनमः श्रीसूर्यायनमः भासयंतंजगद्भासानत्वाभास्वंतमव्ययम् क्रियतेकाशि
नाथेनशीघ्रबोधायसंग्रहः १ रोहिण्युत्तररेवत्योमूलंस्वातिमृगोमघा अनुराधाचहस्तश्चविवाहेमंगलप्रदाः २ इतिविवाहन
क्षत्राणि आवाहंचविवाहंचकन्यावरणमेवच वापयेत्सर्वबीजानिगृहंग्रामंप्रवेशयेत् ३ ग्रंथांतरे माघेधनवतीकन्याफाल्गु
नेसुभगाभवेत् वैशाखेचतथाज्येष्ठेपत्युरत्यंतवल्लभा ४ आषाढेकुलवृद्धिःस्यादन्येमासाश्चवर्जिताः मार्गशीर्षमपीच्छंति
विवाहेकेपिकोविदाः ५ इतिविवाहमासाः अमावास्याचरिक्ताच ४ ९ १४ वारवेलाचजन्मभम् गंडांतः क्रूरवाराश्च-
वर्जनीयाःप्रयत्नतः ६ नंदाभद्राजयारिक्तापूर्णाश्चतिथयःक्रमात् वारत्रयंसमावर्त्यतिथयःप्रतिपन्मुखाः ७ तुर्योर्के ४ सप्त
मश्चंद्रे ७ द्वितीयोभूमिनंदने २ चंद्रपुत्रेपंचमश्च ५ देवाचार्येतथाष्टमः ८।८ दैत्यपूज्येतृतीयश्च ३ शनौषष्ठश्चनिंदितः ६
प्रहरार्द्धःशुभेकार्येवारवेलाचकथ्यते ९ इतिवारवेला भद्रांकर्कटयोगंचतिथ्यंतंयमघंटकं

सू.	चं.	मंग	बुध	गु.	शु.	श	वार
४	७	२	५	८	३	६	वेला.

दग्धातिथिंचभानंचकुलिकंचविवर्जयेत् १० दशम्यांचतृतीयायां १०
३ कृष्णेपक्षेपरेदले सप्तम्यांचचतुर्दश्यां ७।१४ विष्टिःपूर्वेदलेस्मृता
११ एकादश्यांचतुर्थ्यांच ११।४ शुक्लेपक्षेपरेदले अष्टम्यांपूर्णिमायांच ८।१५ विष्टिःपूर्वेदलेस्मृता १२

नंदा	भद्रा	जया	रिक्ता	पूर्णा
१	२	३	४	५
६	७	८	९	१०
११	१२	१३	१४	१५

इतिभद्रा मीनेचापे १२।९ द्वितीयाच २ चतुर्थीवृषकुंभयोः २।११ मेषकर्कटयोः १।४ षष्ठी ६ कन्यायांमिथुने ६।३ एमी ८।१३ द शमी १० वृश्चिकेसिंहे ८।५ द्वादशी १२ मकरेतुले १०।७ एताश्चतिथयोदग्धाः शुभेकर्मणिवर्जिताः १४ इतिदग्धातिथिः विवाहेशुभकार्येषुयात्रायांमरणंध्रुवम्

मे॰	वृ॰	मि॰	क॰	सिं॰	क॰	तु॰	वृ॰	ध॰	म॰	कुं॰	मीन
६	४	८	६	१०	८	१२	१०	२	१२	४	२

कृष्णपक्षः			शुक्लपक्षः	
३	१०	रात्रि॰	४	११
७	१४	दिन॰	८	१५

कृष्यंचधरणीशून्यावाणिज्यंफलनाशनम् १५ इतिदग्धातिथिफलम् मासांतेम्रियतेकन्यातिथ्यंतेस्यादपुत्रिणी नक्षत्रांतेचवैधव्यंविशेषेमृत्युर्द्वयोर्भवेत् १६ सूर्येचसप्तमी ७ सोमेषष्ठी ६ भौमेचपंचमी ५ बुधेचतुर्थी ४ देवेज्येतृतीया ३ भृगुनंदने १७ द्वितीया २ वर्जनीयाचप्रतिपच्चशनैश्चरे १ कुलिकाख्योहियोगोऽयंविवाहादौनशस्यते १८ इतिकुलिकयोगः अवर्गोगरुडोज्ञेयोबिडालःस्यात्कवर्गकः चवर्गःसिंहनामास्यात्टवर्गःकुक्कुरःस्मृतः १९ सर्पाख्यःस्यात्तवर्गोपिपवर्गोमूषकोमतः यवर्गोमृगनामास्यात्तथामेषःशवर्गकः २० स्ववर्गेपरमाप्रीतिर्मित्रेप्री

सू॰	चं॰	मं॰	बु॰	गु॰	शु॰	श॰	वार
७	६	५	४	३	२	१	ति॰

तिश्चकथ्यते उदासीनेप्रीतिरल्पाशत्रुवर्गेमृतिर्भवेत् २१ स्ववर्गात्पंचमःशत्रुश्चतुर्थोमित्रसंज्ञकः ४ उदासीनस्तृतीयस्तु ३ वर्गभेदस्त्रिधोच्यते २२ इतिवर्गप्रीतिः वैरीगरुडसर्पौचवैरंतुश्वानमेषयोः वैरीमूषकमार्जारौवैरंचमृगसिंहयोः २३ ग्रया २

तरे अश्विनीमृगरेवत्योहस्तःपुष्यंपुनर्वसुः अनुराधाश्रुतिःस्वात्यःकथितोदेवतागणः २४ तिस्रःपूर्वा ३ उत्तराश्चतिस्रा ३ प्यार्द्राच रोहिणी भरणीचमनुष्याख्योगणोसौकथितोबुधैः २५ कृत्तिकाचमघाश्लेषाविशाखवाशततारका चित्राज्येष्ठाधनिष्ठाचमूलंरक्षोगणःस्मृतः २६ स्वगणेपरमाप्रीतिर्मध्यमादेवमर्त्ययोः मर्त्यराक्षसयोर्मृत्युःकलहोदेवरक्षसोः २७ इतिगणप्रीतिः षष्ठे ६ स्त्रीपुंसयोर्वैरंमृत्युःस्यादष्टमे ८ ध्रुवम् द्विर्द्वादशेच २।१२ दारिद्र्यंनवमेपंचमे ९।५ कलिः २८ इतिराशिमेलनम्

अ	मृ	रे	ह	पु॰	पु	अ	श्र	स्वा	देवगणः
पू	पू	पू	उ	उ	उ	आ	रो	भ	मनुष्यगणः
कृ	म	आ	वि	श	चि	ज्ये	ध	मू	राक्षसगणः

मीनालिकर्कटा १२।८।४ विप्राः क्षत्रीमेषोहरिर्धनुः १।५।९ शूद्रायुग्मंतुलाकुंभौ ३।७।११ वैश्यःकन्यावृषोमृगः ६।२।१०।२९ नोत्तमामुद्वहेत्कन्यांब्राह्मणींचविशेषतः म्रियतेहीनवर्णोयंब्रह्मणासदृशोयदि ३० इतिवर्णप्रीतिः पौष्णाद्कंषड्भुसुशांतिपूर्वं ६ मार्द्रादिकंद्वादशमध्यभागम् १२ पौरंदराद्यंनवकंभचक्रं ९ परंचभागंगणकाविदग्धाः ३१ पूर्वभागेपतिःश्रेष्ठोमध्यभागेचकन्यका परभागेचनक्षत्रेद्वयोःप्रीतिर्महीयसी ३२ इतिनक्षत्रप्रीतिः सिंहंविनावशाःसर्वेद्विपदानांचतुष्पदाः भक्ष्याजलचरास्तेषांभयस्थानेसरीसृपाः ३३ तुलाच ७ मिथुनं ३ कन्या ६ पूर्वार्द्धधनुषश्च ९ नेद्विपदाख्याः मकरस्यपश्चिमार्द्धंकुंभमीनौजलचराख्याः प्रकीर्तिताः ३४

१२	८	४	विप्रवर्णः
१	५	९	क्षत्रियवर्णः
३	७	११	शूद्रवर्णः
६	२	१०	वैश्यवर्णः

ग्रंथांतरे मकरस्यपूर्वभागो१० मेषः१ सिंहो५ धनुः९ र्वृषः२ चतुष्पदःकीटसंज्ञः कर्कः४ सर्पश्चवृश्चिकः८ ३५ इतिवश्यप्रीतिः योनिर्नाडीगणश्चैवस्वामिमैत्रीषडष्टकम् वर्णश्चवर्गसंज्ञश्चसप्तधाप्रीतिरुच्यते ३६ योनिर्नाडीगणश्चैवस्वामिमैत्रीचवश्ययोः शुजाप्रीतिश्चवर्णश्चप्रीतिःसप्तविधास्मृता ३७ अश्विनीवासवश्चाश्वोरेवतीभरणीगजः पुष्यश्चकृत्तिकाच्छागोनागश्चरोहिणीमृगः ३८ आर्द्रामूलमपिश्वानोमूषकःफाल्गुनीमघा मार्जारोदितिसाश्लेषागोजातिस्तूत्तरात्रयम् ३ ३९ महिषोस्वातिहस्तोच मृगोज्येष्ठानुराधिके व्याघ्रश्चित्राविशाखाचश्रुत्याषाढेचमर्कटौ ४० शतंभद्रापदासिंहोनकुलश्चाभिजित्स्मृतः योनयः कथिताभानां-

अ·	भ·	कृ·	रो	मृ·	आ	पु·	पु·	आ·	म	पू	उत्त·	ह·	चि·
अश्व	गज	छाग	नाग	नाग	श्वा·	मार्जा	छाग	मा·	मूष	मूष	गोः	महि	व्याघ्र
स्वा·	वि·	अ·	ज्ये·	मू·	पू·	उ·	अ	श्र·	ध·	श·	पू·	उ·	रेवती
महि	व्या·	मृगः	मृग	श्वा·	मर्क·	गोः	नकु·	मर्कट	अश्व	सिंह	सिंह	गोः	गज

वैरंमैत्रीविचार्यताम् ४१ गोव्याघ्रंगजसिंहमश्वमहिषंश्वैणंचबभ्रूरगंवैरंवानरमेषकंचसुमहत्तद्वद्बिडालेंदुरम् लोकानांव्यवहारतोतदपिचज्ञात्वाप्रयत्नादिदंदंपत्योर्नृपभृत्ययोरपिसदावर्ज्यंशुभस्यार्थिभिः ४२ रत्नमालायाम् इतियोनिप्रीतिः मरणेपितृमात्रोश्चसंग्राह्योनवपंचमो ९।५ वरस्यपंचमे५ कन्याकान्यायानवमेवरः ९ ४३ एतत्त्रिकोणकंग्राह्यं९।५ पुत्रपौत्रसुखावहम् षडष्टके६।८ भवेन्मृत्युरतस्तन्नद्विचारयेत् ४४ इतिराशिमेलनम् वरस्यभास्करबलंकन्यकायागुरोर्बलम् द्वयो- ३

श्चंद्रबलंग्राह्यंविवाहोनान्यथाभवेत् ४५ जीवोजीवप्रदाताचधनदाताचचंद्रमाः तेजोदाताभवेत्सूर्यस्त्रयः खलुबलाबलाः ४६ जीवहीनामृताकन्यातेजोहीनोमृतोवरः चंद्रहीनागतालक्ष्मीस्तस्मात्तत्परिवर्जयेत् ४७ अष्टमेच८ चतुर्थेच४ द्वादशेच१२ दिवाकरे विवाहितोवरोमृत्युंप्राप्नोत्यत्रनसंशयः ४८ जन्मन्यथ१ द्वितीयेवा२ पंचमे५ सप्तमेपिवा७ नवमेच९ दिवानाथेपूजयापाणिपीडनम् ४९ एकादशे११ तृतीयेवा३ षष्ठेवादशमेपिवा१० वरस्यशुभदोनित्यंविवाहेदिननायकः ५० इतिरविबलं अष्टमे८ द्वादशेवापि१२ चतुर्थेवाबृहस्पतौ ४ पूजातत्रनकर्तव्याविवाहेप्राणनाशकः ५१ षष्ठे६ जन्मनि१ देवेज्येतृतीये३ दशमे१०पिवा भूरिपूजाप्रजिनःस्यात्कन्यायाःशुभकारकः ५२ एकादशे११ द्वितीये२वापंचमे५ सप्तमे७पिवा नवमेच९ सुराचार्यःकन्यायाः कथितःशुभः ५३ झष१२चाप९ कुलीरस्थो४ जीवस्त्वशुभगोपिच अतिशोभनतांदद्याद्विवाहोपनयनादिषु ५४ गणककमंडलौ इतिगुरुबलम् आद्ये१ चंद्रःश्रियंकुर्यान्मनस्तोषंद्वितीयके२ तृतीये३ धनसंपत्तिश्चतुर्थे४ कलहागमः ५५ पंचमे५ ज्ञानवृद्धिःस्यात् षष्ठे६ संपत्तिरुत्तमा सप्तमे७ राजसन्मानोमरणंचाष्टमे८ तथा ५६ नवमे९ धर्मलाभश्च दशमे१० मानसेप्सितम् एकादशे११ सर्वलाभोद्वादशे१२ हानिरेवच ५७ इतिचंद्रबलम् अष्टवर्षा८ भवेद्गौरीनववर्षा९ चरोहिणी दशवर्षा१० भवेत्कन्याततऊर्ध्वंरजस्वला ५८ गौरीगुरुबलेदेयारोहिणीभास्करस्यच कन्याचंद्रबलेदेयाअष्टदोषान्विवर्जयेत् ५९ गौरींदद्यान्नागलो-

कंवेकुंठंरोहिणींददेत् कन्यांदद्याद्ब्रह्मलोकंरौरवंतुरजस्वलाम् ६० द्वादशे१२कादशेवर्षे११ यस्याःशुद्धिर्नजायते प्रजाभिःशकु
नैर्वापितस्यालग्नंप्रदापयेत् ६१ पंचोर्ध्वस्थापयेद्रेखापंचतिर्यङ्मुखास्तथा ५ द्वयोश्चकोणयोर्द्वेद्वे २ चक्रंपंचशलाककम् ६२ ईशा-
न्येकृत्तिकादेयाक्रमादन्यानिभानिच ग्रहास्तेषुप्रदातव्यायेचयत्रप्रतिष्ठिताः ६३ लग्नस्यनिकटेयाचगताभवतिपूर्णिमा १५ तन्न
क्षत्रेस्थितश्चंद्रोदातव्योगणकोत्तमैः ६४ इतिपंचशलाकावेधचक्रम् लत्ता१ पातो२ युति३ र्वेधो४ जामित्रं५ बुधपंचकम् ६ ए



कार्यलोपग्रहोच ८ क्रांतिसाम्यं९ तथापरम् ६५ दग्धातिथिश्च विज्ञेया१० दशदोषामहाबलाः एता
न्दोषान्परित्यज्यलग्नंसंसाधयेद्बुधः ६६ नक्षत्रंद्वादशंभानु १२ स्तृतीयंलत्तयाकुजः ३ षष्ठंजीवो६
ष्टमंमंदो८ हंतिदक्षिणतःसदा ६७ वामेनसप्तमं७ चांद्रिनवमं९ सिंहिकासुतः हंतिभंपंचमं५ शुक्रो
द्वाविंशो२२ पूर्णचंद्रमाः ६८ रवेर्लत्ताहरेद्वित्तंकुजस्यकुरुतेमृतिम् बृहस्पतेर्बंधुनाशंशनेःकुर्यात्कुलक्षय
म् ६९ बुधस्यकुरुतेत्रासंलत्ताराहोर्विनाशयेत् शुक्रस्यदुःखदानित्यंत्रासदाचकलानिधेः ७० इति-
लत्ता सूर्ययुक्ताच्चनक्षत्रादेषुपातोभिजायते मघा१ श्लेषा२ चचित्रा३
चस्वातुराधा४ चरेवती५ ७१ श्रवणोपिच६ षष्ठोयंपातदुष्टोनिगद्यते

रवि१२	मंग·३	बृह·६	श·८	दक्षिणे
बुध७	राहु९	शुक्र५	चंद्र२२	वामे·

अश्विनीमवधिंकृत्वागणयेल्लग्नभावधिम् ७२ पावकः१ पवमानश्च२ विकारिः३ कलहोपरः४ मृत्युः५ क्षयश्च६ विज्ञेयापातपद्कस्य
लक्षणम् ७३ पातेनपतितोब्रह्मापातेनपतितोहरिः पातेनपतितःशंभुस्तस्मात्पातंविवर्जयेत् ७४ इतिपातः यत्रग्रहेभवेच्चंद्रोग्रह
स्तत्रयदाभवेत् युतिदोषस्तदाज्ञेयोविनाशुक्रंशुभाशुभम् ७५ इतियुतिः एकरेखास्थितेर्वेधोदिननाथादिभिर्ग्रहैः विवाहेत-
त्रमासंतुनजीवतिकदाचन ७६ अश्विनीपूर्वफाल्गुन्याभरणीचानुराधया अभिजिच्चापिरोहिण्याकृत्तिकाचविशाखया ७७ मृ-
गश्चोत्तरषाढेनपूर्वाषाढातथार्द्रया पुनर्वसुश्चमूलेनतथापुष्यश्चज्येष्ठया ७८ धनिष्ठयातथाश्लेषामघापिश्रवणेनच रेवत्युत्तर
फाल्गुन्याहस्तेनोत्तरभाद्रपात् ७९ स्वातीशतभिषाविद्धाचित्रयापूर्वभाद्रपात् विद्धान्येतानिवर्ज्यानिविवाहेभानिकोविदैः ८०
रविवेधेचवैधव्यंकुजवेधेकुलक्षयः बुधवेधेभवेद्वंध्याप्रवर्ज्यागुरुवेधतः ८१ अपुत्राशुक्रवेधेचसौरेचंद्रेचदुःखिता परपुरुषर
ताराहोकेतौस्वच्छंदचारिणी ८२ इतिवेधः चतुर्दशंच१४ नक्षत्रंजामित्रंलग्नभात्स्मृतम् शुभयुक्तंतदिच्छंतिपापयुक्तंचवर्ज
येत् ८३ चंद्रचांद्रिशुक्रजीवाजामित्रेशुभकारकाः स्वर्भानुभानुमंदाराजामित्रेनशुभप्रदाः ८४ चंद्राद्वालग्नतोवापिग्रहाव
र्ज्याश्चतुर्दशे१४ तत्रस्थिताग्रहान्नूनंव्याधिवैधव्यकारकाः ८५ इतिजामित्रम् धार्यास्तिथि१५ र्मास१२ दशा१० ष्ट८ वेदाः४ सं
क्रांतितोयातदिनैश्चयोज्याः ग्रहै९र्विभागोयदिपंचशेषं५ रोगादि१ वह्नि२ नृप३ चोर४ मृत्युः५ ८६ यद्यर्कवारेकिलरो-

गपंचकंसोमेचराज्यंक्षितिजेचवह्निः शनौचमृत्युःकुरमंत्रिचौर्यैविवाहकालेपरिवर्जनीयम् ८७ ग्रंथांतरे इतिबुधपंचकम्
अथदाक्षिणात्यंबुधपंचकं ग्रंथांतरोक्तंलिख्यते लग्नेनाढ्यायाततिथ्यौकनष्टाशेषेनागद्याब्धिनकेंदुसंख्ये रोगो१ वह्नी२ राज
चौरौ३।४ चमृत्यु ५ र्बाणश्चायंदाक्षिणात्यप्रसिद्धः ८८ रात्रौचोररुजौदिवाग्निनृपतीत्याज्यौसदासंध्ययोर्मृत्युश्चायशनौ
नृपोविदिमृतिर्भौमेग्निचोरौरवौ रोगोथव्रतगेहगोपनृपसेवर्ष्या नपाणिग्रहेवर्ज्याश्चक्रमशोबुधेरुग१नल २क्ष्मापाल ३चोर
४मृतिः५ ८९ रस६गुण३शशि१नागा८ब्ध्याढ्यसंक्रांतियातांशकमितरथनष्टांकेर्यदापंचशेषाः रुग१नल२नृप३चोरा४
मृत्युसंज्ञश्च ५बाणोनवह्नतशरशेषेशेषकैक्येसशल्यः ९० इतिमुहूर्तचिंतामणौ सूर्यभात्पंचमेविद्यु ५न्नक्षत्रेशूलमष्टमे ८
चतुर्दशेशनेःपातः१४ केतुरष्टादशेतथा१८ ९१ ऊनविंशेभवेदुल्का१९ निर्घातश्चद्विविंशके २२ त्रयोविंशतिकेकंप२३श्चतुर्वि
शेचवज्रकः २४ ९२ पुत्रनाशकरीविद्युत्मृत्युःशूलोविनाशकः शनेःपातौवंशघातीकेतोर्दैवरनाशकः ९३ द्रव्यनाशकरीचो-
ल्कानिर्घातोबंधुनाशकः कंपःकंपयतेनित्यंवज्रेस्त्रीव्यभिचारिणी ९४ बाण ५अष्ट८ चतुर्दश१४ अष्टादश१८ एकोनविंश
ति१९ द्वाविंशति२२ त्रयोविंशति२३ चतुर्विंश २४ उपग्रहाः सूर्यर्क्षतः इत्युपग्रहाः योगांकेविषमेचैको१ ज्ञेयोष्टाविंशतिः
२८ समे अर्द्धकृत्वाऽश्विनीपूर्वमंकभंसूर्धिदीयते ९५ विष्कंभेचाश्विनीदेयाप्रीतौस्वातिर्निगद्यते सौभाग्येचविशाखास्यादायुष्मान्भ

रणीयुतः ९६ शोभनेकृत्तिकादेयाल्त्वनुराधातिगंडके रोहिणीचसुकर्माख्येधृतौज्येष्ठाप्रकीर्तिता ९७ गंडेमूलंमृगःशूले वृद्धौचार्द्रा
निगद्यते पूर्वाषाढाध्रुवेप्रोक्ताव्याघातेचपुनर्वसुः ९८ हर्षणेचोत्तराषाढावज्रेःपुष्यःप्रकीर्तितः अभिजिच्चतथासिद्धावाश्लेषाव्यति-
पातके ९९ वरीयसिश्रुतिर्देयापरिघेचमघातथा शिवेधनिष्ठादातव्यासिद्धेपूर्वाचफाल्गुनी १०० साध्येशतभिषादेयाशुभेचोत्तरफाल्गु
नी पूर्वाभाद्रपदाशुक्लेहस्तेब्रह्माप्रकीर्तितः १ उत्तराभाद्रपचैंद्रेचित्रादेयाचवैधृतौ सूर्यचंद्रमसोर्योगेभवेदेकार्गलस्तथा २ दिनकर-

हिमरश्मौदृष्टिसंपातजन्माभवतिविकृतमूर्तिःकोपिरौद्रोमनुष्यः पततिभुवनम-
ध्येमंगलानांविनष्टेज्वलनकपिलदृष्टानिर्दहंत्याजगंति ३ रत्नमालायाम् त्रयोद-
शतिरेरेषाएकोर्ध्वामूर्ध्निविस्मृता योगांकेप्राप्तनक्षत्रेज्ञेयमेकार्गलंबुधैः ४ यात्रा
यांमरणंविंद्यादारंभेकार्यनाशनम् वैधव्यंस्याद्विवाहेचदाहश्चवसनांगृहे ५ ग्रंथान्तरे इत्येकार्गलः ऊर्ध्वास्तिस्रस्तिरास्तिस्रोमध्येमी-
नं१२लिखेद्बुधः सूर्यचंद्रमसोर्दृष्टौक्रांतिसाम्यंनिगद्यते ६ मीनःकन्यकयायुक्तो१२।६ मेषसिंहेनसंगतः १।५ मकरेणवृषःक्रांत
१०।२ श्चापोपिमिथुनेनच ९।३ ७ कर्केणवृश्चिकोविद्धो४।८ वेधश्चतुलकुंभयोः७।११ क्रांतिसाम्यकृतोद्वाहोनजीवतिकदाचन ८
क्रांतिसाम्यंयदाकुंभेतदानद्दहतेतनुम् ११ पितुर्विनाशोमीनेवा१२ मेषेचपतिनाशनम् १।९ वृषेकुक्षिभवापीडा२ मिथुने३ कामचारि

णी वंध्यास्त्रीचतथाकर्के ४ करोतिकुरुतेगृहम् १० इतिक्रांतिसाम्यम् मर्मवेधः १ कंटकश्चशल्यं ३ छिद्रं ४ चतुर्थकम् एतद्दोष
चतुष्कंचपरित्याज्यंप्रयत्नतः ११ लग्नेपापेमर्मवेधः १ कंटकोनव ९ पंचमे ५ चतुर्थेदशमे ४।१० शल्यंछिद्रंभवतिसप्तमे ७।१२ मर

	१	१२	११	
२	क्रां	ति		१०
३	सा	म्य		९
४				८
	५	६	७	

णंमर्मवेधेस्यात्कंटकेचकुलक्षयः शल्येचनृपतेर्भीतिः पुत्रनाशश्चछिद्रके १३ इतिमर्मवेधादिचतुष्कदोषफलं
मासांतेदिनमेकंतु १ तिथ्यंतेघटिकाद्वयम् २ घटिकात्रितयंभांते ३ विवाहेपरिवर्जयेत् १४ जन्ममासे १ जन्म-
भेच १ नचजन्मदिनेबुधः ज्येष्ठमासेनज्येष्ठस्यविवाहंकारयेत्क्वचित् १५ नकन्यावरयोर्ज्येष्ठेज्येष्ठयोः पाणिपी
डनम् द्वयोरेकतरेज्येष्ठेनज्येष्ठेदोषमावहेत् १६ सिंहेगुरौगतेकार्योनविवाहःकदाचन मेषस्थेचदिवानाथेसिं
हस्थोपिशुभप्रदः १७ रवौसार्द्धत्रयोभागा ३॥ श्चंद्रेपंच ५ गुरोस्त्रयम् ३ द्वेशुक्रे २ द्वेबुधेनैव २ भागाविश्वप्रदाअ-
मी १८ प्रत्येकंसार्द्धभागाश्चमंदमंगलराहुषु १॥ ग्रहाबलयुताविश्वान्प्रयच्छंतिनदुर्बलाः १९ इतिविश्वाः पातालां ४ बरयो १० र्हि-
२ पंच ५ नवमे ९ लग्नेषुसौम्याग्रहाः क्रूराः षष्ठ ६ गताः शशीधनयुतः २ सर्वेतृतीयैकादशे ३ ११ यात्रारंभविवाहलग्नसमयेराज्या
भिषेकेनृणांजामित्रंग्रहवर्जितंयदिभवेत्सर्वेपितेशोभनाः २० तृतीयैकादशे ३।११ सर्वेसौम्याः पापाःशुभप्रदाः तेचसर्वेसमस्था
७ मृत्कदावरकन्ययोः २१ इतिविश्वाः त्याज्यालग्नेऽब्धयोमंदा ४ त्षष्ठेशुक्रेंदुलग्नपाः ६ रंध्रे ९ चंद्रादयः पंच ५ सर्वेतेब्जसमागु-

रौ २२ ग्रंथांतरे शनिःसूर्यश्चलग्नस्थ १।७ श्चंद्रोलग्नेष्टमेरिपौ १।८।६ कुजोलग्नेष्टमेचास्ते १।८।७ शुक्रोद्यूनेष्टमेरिपौ ७।८।६ २३ गुरु
र्मृत्यौसैंहिकयो ८ लग्नेतुर्येचसप्तमे १।४।७ बुधोष्टमेच ८ जामित्रे ८।७ विवाहेप्राणनाशकः २४ क्रूरयोरंतरेलग्नंचंद्रंचपरिवर्जयेत् व-
रंहतिद्रुतंलग्नंशीतरश्मिश्चकन्यकाम् २५ इतिग्रहाणांशुभाशुभविचारः तुलाच ७ मिथुनं ३ कन्या ६ पूर्वार्द्धोधनुषो ९ वृषः २ एतेल
ग्नेषुभानित्यंमध्यमाश्चपरेस्मृताः २६ लत्तामालवकेदेशेपातश्चकुरुजांगले एकार्गलश्चकाश्मीरेवेधंसर्वत्रवर्जयेत् २७ मेषे १ नवांशा९
मेषाद्या १ वृषे २ चमकरादिकाः १० मिथुनेचतुलाद्याःस्युः ७ कर्कटेकर्कटादिकाः ४।२८ मेषाद्येच १ धनुः ९ सिंहो ५ गोकन्ये २।६ मकरा-
दिके १० तुलाद्ये ७ तुलकुंभौच ११ कर्काद्ये ४ मीनवृश्चिकौ १२।८ २९ गोतुला २।७ युग्म ३ कन्यानां ६ नवांशाःशुभदाःस्मृताः धनुषः ९ प्र
थमोभागोविवाहेन्येचमध्यमाः ३० अंशस्यपतिरंशेचतन्मित्रंवाशुभोपिवा पश्येत्तदाशुभोज्ञेयः सर्वेदोषाश्चनिष्फलाः ३१ शुक्लाष्टमीं
८ समारभ्यफाल्गुनस्यदिनाष्टकम् पूर्णिमावधिकंत्याज्यंहोलाष्टकमिदंशुभे ३२ शतद्र्वांचविपाशायामैरावत्यांत्रिपुष्करे होलाष्ट-
कंविवाहादौत्याज्यमन्यत्रशोभनम् ३३ इतिहोलाष्टकम् दिनेसदांधावृषमेषसिंहा १।२।५ रात्रौचकन्यामिथुनंकुलीराः ६।३
४ मृगस्तुलालिर्बधिरः पराह्णे १०।७।८ संध्यासुकुब्जाघटधन्वमीनाः ११।९।१२ ३४ दिवांधोवरहंतावराव्यंधोधननाशकः दुःख
दोबधिरोलग्नःकुब्जोवंशविनाशकः ३५ लग्नायप्रवनेयदिवारवौवादिवांधलग्नंनहितत्रदोषम् रात्र्यंधलग्नेयदिइंदुकेंद्रे १।४।७।१०

३	२०	मेष	वृष	मि·	कर्क	सिं·	क·	तूल	वृ·	ध·	मक·	कुं	मीन
६	४०	१	१०	७	४	१	१०	७	४	१	१०	७	४
१०	०	२	११	८	५	२	११	८	५	२	११	८	५
१३	२०	३	१२	९	६	३	१२	९	६	३	१२	९	६
१६	४०	४	१	१०	७	४	१	१०	७	४	१	१०	७
२०	०	५	२	११	८	५	२	११	८	५	२	११	८
२३	२०	६	३	१२	९	६	३	१२	९	६	३	१२	९
२६	४०	७	४	१	१०	७	४	१	१०	७	४	१	१०
३०	०	८	५	२	११	८	५	२	११	८	५	२	११
		९	६	३	११	९	६	३	१२	९	६	३	१२

संध्याकविःकेंद्र१।४।७।१० शुभंविवाहे ३६ यत्रचैकादशश्चंद्रो ११ द्वितीयो२ वातृतीयके ३ गोधूलिकः सविज्ञेयः शेषाधूलिमुखास्मृताः ३७ कुलिकः १ क्रांतिसाम्यंच २ लग्ने१ षष्ठाष्टमे६।८शशी तदागोधूलिकस्त्याज्यः पंचदोषैश्चदूषितः ३८ यदानास्तगतोभानुर्गोधूल्यापूरितंनभः सर्वमंगलकार्येषुगोधूलिश्चप्रशस्यते ३९ अष्टमे ८ जीवभौमेचबुधश्चभार्गवोष्टमे ८ लग्नेषष्ठाष्टगश्चंद्रो१।६।८ गोधूलेनाशकृत्तदा ४० इतिगोधूलिः सहजाय११ धने२ धर्मे९ दशमे१० देवबाणयोः ४।५ गोधूलिकः सविज्ञेयः शेषाधूलिमुखाःस्मृताः ४१ इतिगोधूलिः लग्नादेकादशेसर्वे११ लग्नपुष्टिकराग्रहाः तृतीये३ चाष्टमे८ सूर्यः सूर्यपुत्रश्चशोभनः ४२ चंद्रोधने२ तृतीयेच३ कुजः षष्ठे६ तृतीयके३ बुधेज्योनव९ षट्६ द्वि२ त्रि३ चतुः४ पंच५ दश१० स्थितौ ४३ शुक्रोद्वि२ त्रि३ चतुः४ पंच५ धर्म९ कर्म१० तनु१ स्थितः राहुर्दशा१० ष्ट८ षट्६ पंच५ त्रि३ नव९ द्वादशो१२ शुभः ४४ इतिरेषाप्रदाग्रहाः छायापादैरसोपेतै६ रेकविंशच्छतं१२१ भजेत् लब्धांके

घटिकाज्ञेयाः शेषांकेचपलाःस्मृताः ४५ इतिदिनलग्नज्ञानम् पूर्वाषाढानुराधाचज्येष्ठाश्लेषाचरेवती विशाखाचयदामूर्ध्निंतदास्यादष्टमोदयः ४६ मस्तकेमृगशीर्षंचमूलंचनवमोदयः९ अन्यदृक्षंयदामूर्ध्निंतदास्यात्सप्तमोदयः७ ४७ सूर्यभान्मौलिभंगण्यंसप्तहीनंचशेषकम्७ द्विगुणंच२ द्वि२ हीनंचगताराात्रिस्फुटंभवेत् ४८ इतिरात्रिलग्नज्ञानम् उदयाद्यागतानाड्यस्तासामर्द्धेनसंख्या सूर्यभाद्यद्भवेदृक्षंतेनलग्नस्यनिर्णयः ४९ ग्रंथांतरे इतिरात्रिलग्नम् किंकुर्वंतिग्रहाः सर्वेयस्यकेंद्री१।४।७।१० बृहस्पतिः मत्तमातंगयूथानांशतंहंतिचकेसरी १५० शुक्रोदशसहस्राणि१०००० बुधेदशशतानिच१००० लक्षमेकंतुदोषाणां१००००० गुरुर्लग्नेव्यपोहति ५१ सर्पाकारंलिखेच्चक्रंविवाहेचत्रिनाडिकम् अश्विनीप्रमुखंभंचदत्वासाम्यंविचारयेत् ५२ एकनाडिस्थनक्षत्रेदंपत्योर्मरणंध्रुवम् सेवायांचभवेद्धानिर्विवाहेत्वशुभंभवेत् ५३ इतिफणिचक्रम् अथग्रंथांतरे अश्विन्यार्द्रापुनर्वसूउत्तराहस्तमेवच ज्येष्ठामूलंशतश्चैवपूर्वाभाद्रपदात्यजेत् ५४ भरणीमृगशिरःपुष्योभगाश्चित्रानुराधयोः

अ	भ	कृ॰
आ	मृ॰	रो
पु	पुः	आ
उ	पु	म॰
ह	चि	स्वा
ज्ये	अ॰	वि
मू	पू	उ
श॰	ध॰	श्र
पू	उ॰	रे॰

पूर्वाषाढाधनिष्ठाचोत्तराभाद्रपदात्यजेत् ५५ कृत्तिकारोहिण्याश्लेषामघास्वातिविशाखयोः उत्तराश्रवणरेवत्यांना
डीवेधंसदात्यजेत् ५६ अत्यंतप्रीतिर्धनधान्ययुक्तोयद्येकराशौन्नृपतेर्विधेया कन्यावरस्यैकनक्षत्रवर्ज्यमुदाहृतंशाक
रसंहितायाम् ५७ आदिनाडीपतिंहंतिमध्यनाडीचकन्यकाम् अंतिनाडीद्वयोर्हंतिनाडीवेधंविवर्जयेत् ५८ इतिनाडी
वेधः ग्रंथांतरे परिघार्द्धव्यतीपातंवैधृतिंसकलंत्यजेत् विष्कंभेघटिकाःपंच५शूलेसप्त७प्रकीर्तिताः ५९ षट्गंडे६व्या
तिगंडेच६नवव्याघातवज्रयोः ९ एतेचनवयोगास्तुवर्जनीयाःसदाबुधैः ६० इतिपरिघादिवर्ज्ययोगः पटाकारंलि
खेच्चक्रमष्टकोण ८ समन्वितम् यस्मिन्नृक्षेभवेत्सूर्यस्तदाद्यंमध्यगंत्रयम् ३ ६१ त्रयं३ त्रयं३ चसर्वत्रततःपूर्वादि
तोलिखेत् नक्षत्रत्रितयंमध्ये३ पक्षद्वयविनाशकम् ६२ पूर्वस्थानेभवेल्लक्ष्मीर्धनधान्यसमागमः अग्निकोणेभवे
न्मृत्युर्नारीकुलविनाशिनी ६३ दक्षिणेदुर्भगानारीदारिद्र्यंमृत्युमाप्नुयात् नैर्ऋत्यांपुत्रलाभश्चसुखसौभाग्यमेवच
६४ पश्चिमेविधवाकन्यावायव्येव्यभिचारिणी उत्तरेधनधान्यानिईशान्यांसुखसंपदः ६५
मांगल्येसर्वकार्येपिपट्टचक्रंविचारयेत् गर्गाचार्येणसंप्रोक्तंसर्वसिद्धिप्रदायकम् ६६ इति
पट्टचक्रम् इतिश्रीकाशीनाथभट्टाचार्यविरचितेशीघ्रबोधेविवाहप्रकरणंप्रथमम् १ ५ ५

ईशानी३	पूर्व३	अग्नि
उत्तर३	मध्य॰३सू	दक्षिण
वाय॰३	पश्चि॰३	नैर्ऋ॰३

अथमुहूर्तप्रकरणम् धातृयुग्मं२ द्वयोमैत्रंश्रुतियुग्मं२ करत्रयम्३ पुनर्वसुद्वयं२ पूषामूलंचाप्युत्तरात्रयम्३ ॥१॥ विषमो वत्सरोमा-
सोमार्गोमाघश्चफाल्गुनः मकरो१० मिथुनं३ मीनो१२ लग्नेकन्यातुला७ धरः ॥२॥ भौमार्किवर्जितावारागृह्यंतेचद्विरागमे षष्ठी६रिक्ता
४।९।१४ द्वादशीच१२ सामावास्याचवर्जिता ॥३॥ इतिद्विरागमनम् आर्द्रात्रयं३ भाद्रयुग्मं२ मृगः पूषाश्रुतिः करः मूलत्रयं३ गुरुः
सूर्योभौमोरिक्तां ४।९।१४ विनातिथिम् ॥४॥ आद्ये१ द्वये२ त्रयें३ मासेलग्नेकन्या६ झषे१२ स्थिरे २।५।८।११ चापे९ पुंसवनंकुर्यात्सीम
तंचाष्टमेतथा ५ साकाकवंध्याभवतीनिशुक्रेस्वल्पप्रजापुंसवनेबुधेतु सौरेणमृत्युः पयसोल्पतेंदौधर्मार्थकामारविभौमजीवे ॥६॥

आ	पु	पू	पूभा	उ	मृ	रे
श्र	ह	मू	पूषा	उ॰	न	सू॰
गु	भौ	वा	१	२	३	५
६	७	८	१०	११	१२	१३
ति॰	१	२	३	४	मा	६
२	५	८	११	१२	९	ल॰

इतिपुंसवनंसीमंतकर्म ग्रंथांतरे शुभेत्रिकोणेकेंद्रस्थे९।५।१।४।७
१० पापेषष्ठे६ त्रिलाभगे३।११ पुत्रकामस्त्रियंगच्छेन्नरोयुग्मासु२
रात्रिषु ॥७॥ पुनर्वसुद्वये२ हस्तत्रये३ मैत्रद्वये२ मृगे मूलोत्तरधनि
ष्ठासु द्वादशे१२ कादशे११ दिने ॥८॥ अन्यत्रापिशुभेयोगेवारेबुधश
शांकयोः भानोर्गुरोः स्थिरेलग्नेबालनामकृतिःशुभा ॥९॥ इतिना
मकरणं मैत्रत्रये३ हरिद्वंद्वे२ विधिद्वंद्वे दिनद्वये२ स्वातिहस्तोत्तरा

रो	मृ	अ	अ	श्र	ध॰	ह	चि	स्वा
पु	पू	रे	मू	उ	उ	उ	न	१
३	५	७	९	११	व	म	मा	फा॰
वै	मा	१०	३	१२	६	७	ल	सू
चं	बु	वृ	शु	वा	१	२	३	५
७	८	१०	११	१३	१५	ति	थि	०

पादेपूषार्यमद्वयेषुच१० सिंहत्रये३ घटे११ लग्नेमासद्वय२ चतुर्थयोः ४ याचानियौच१।२।३।५।७।१०।११।१३ निष्क्रास्यःशिशुर्नेवार्कि
भौमयोः ॥११॥ इतिनिष्क्रासः हस्तादिपंचके५ श्विन्यांधनिष्ठायांचपूष्णि गुरोश्शुक्रेबुधेवारे धार्यस्त्रीभिर्नवांबरम् ॥१२॥ लग्नेमीने-
च१२ कन्यायां६ मिथुनेच३ वृषे२ शुभम् पुंसांपुनर्वसुद्वंद्वे२ रोहिण्युत्तरभेषुच ॥१३॥ रोहिणीशुरुपुनर्वसूत्तरेयाविभर्तिनववस्त्रभू-

अ	ज्ये	मू	श्र	ध	रो	मृ	पु
पु	स्वा	ह	उषा	रे	उ	अ	न
५	६	७	११	ल	३	४	मा
१	२	३	५	७	१०	११	१३
ति	सू	चं	बु	बृ	शु	वा	र
०	०	०	०	०	०	०	०

षणम् सानयोषिदवलंबतेपतिर्निस्नानमाचरतिवारुणेनच ॥१४॥ ग्रंथांतरे इतिनववस्त्रपरिधानम् न-
वान्नभोजनेग्राह्यंवस्त्रेप्रोक्तमशेषतः वारेधिकोसूर्यभौमौ नक्षत्रेश्रवणोमृगः ॥१५॥ आद्यान्नप्राशनेपू-
र्वा३ सार्पार्द्रावारुणंयमः नक्षत्रेषुपरित्याज्योवारोभौमार्कनंदनौ ॥१६॥ द्वादशी१२ सप्तमी७ रिक्ता४
९।१४ पर्व१५।३० नंदा१।६।११ स्तुवर्जिताः लग्नेषुचझषो१२ ग्राह्योवृषः२ कन्याच६ मन्मथः३ ॥१७॥
शुक्लपक्षःशुभोयोगः संग्राह्यःशुभचंद्रमाः मासौषष्ठाष्टमौ६।८ पुंसांस्त्रीणांमासश्चपंचमः५ ॥१८॥
इतिप्रथमान्नप्राशनम् पुनर्वसुद्वये२ ज्येष्ठामृगेचश्रवणद्वये२ हस्तत्रये३ चरेवत्यांशुक्लपक्षोत्तराय-
णे ॥१९॥ लग्नेगोर२ स्त्री६ धनुः९ कुंभ११ मकरे१० मन्मथे३ तथा सौम्येवारेशुभेयोगेचूडाकर्मस्मृतंबुधैः ॥२०॥ चूडाकर्मणिहेयास्तु
जन्ममासश्चजन्मभम् ॥ रिक्ता४।९।१४ षष्ठी६ चपर्वणि१५।३० प्रतिपच्च१ तिथिष्वपि ॥२१॥ इतिचूडाकर्म हस्तत्रये३ हरिद्वंद्वे२ पू-

र्वा३ श्विमृगपंचके५ मूलेपूष्णिचनक्षत्रेबुधेर्केगुरुशुक्रयोः ॥२२॥ देवोत्थानेमीनचापे१२।९ लग्नेवर्षेत्त्वपंचमे५ विद्यारंभोत्रवर्ज्या-
श्चषष्ठ्य६ नध्यायरिक्तकाः ८।१।३०।४।९।१४ ॥२३॥ इतिविद्यारंभः पूर्वाषाढाश्विनीहस्तत्रयेचश्रवणत्रये ज्येष्ठाभगमृगेपु-
ष्येरेवत्यांचोत्तरायणे ॥२४॥ द्वितीयायां२ तृतीयायां३ पंचम्यां५ दशमीत्रये१०।११।१२ सूर्यशुक्रगुरुराचार्यवारेपक्षेतथासिते ॥२५॥
लग्नेवृषे२ धनुः९ सिंहे५ कन्या६ मिथुनयो३ रपि व्रतबंधःशुभेयोगेब्रह्मक्षत्रविशांभवेत् ॥२६॥ इतिव्रतबंधः श्रुतित्रये३ दिति-
द्वंद्वे२ मैत्रहस्तत्रयो३ त्तरे३ भगेविधियुगे२ मूलेपूषाश्विसौम्यवारके ॥२७॥ द्विःस्वभावेघटेलग्ने३।६।९।१२।११ कर्णवेधःशुभोभ-
वेत् चैत्रपौषौहरेःस्वापवर्षत्वयुगुलंत्यजेत् ॥२८॥ इतिकर्णवेधः पुनर्वसुद्वयं२ चित्राविशाखाभरणीद्वयम्२ मूलमार्द्रामघाहेयाः
श्रवणोदशमस्तथा ॥२९॥ सोमशुक्रबुधान्सूतिप्रसूतिस्नानकर्मणि हेयाप्रतिपदा१ षष्ठी६ नवमीच९ तिथिक्षयः ॥३०॥ इतिस्त्रीप्र-
सूतिस्नानम् मूलादितिद्वयं२ ग्राह्यंश्रवणाश्वमृगःकरः जलवाप्यर्चनेहेयाशुक्रमंदार्कभूमिजाः ३१ इतिजलवापीपूजा अनु-
राधाचतुष्केतु४ मघादितियुगे२ करे स्वातिश्रुतिविधिद्वंद्वे२ रेवत्यामुत्तरासुच ॥३२॥ गोद्वये२ स्त्री६ झषे१२ हालःकार्योहेयःशनि-
कुजः षष्ठी६ रिक्ता४।९।१४ द्वादशीच१२ द्वितीया२ द्वयपर्वच३।१५।३० ॥३३॥ त्रिभि३ स्त्रिभि३ स्त्रिभिः३ पंच५ त्रिभिः३ पंच५ त्रि-
भि३ र्द्वयम्२ सूर्यभाद्दिनभंयावद्धानिरुद्धीहलेक्रमात् ॥३४॥ इतिहलप्रवाहः पूर्वाषाढादितिद्वंद्वे२ विधियुग्मं२ हस्तित्रयम्३

अ	ज्ये	मू	पू·	म·	पु	पू	ह·
स्वा	श्र·	रो	मृ	रे	उ३	उ·	उ·न
२	३	६	१२	ल	सू·चं	बु·वृ	शु·
बो·	१	५	७	१०	११	१३	ति
३	३	३	५	३	५	३	२
हा·	वृ·	हो	वृ·	हो·	वृ·	हो	वृ·

उत्तराफाल्गुनीहस्तत्रयं३ मूलंचरेवती॥३५॥ मैत्राश्विनीचलग्नंतुसिंहः५ कन्या६ घटो११ वृषः२
मिथुनंमकरो३।१० ग्राह्योवास्तुकर्मणिकोविदैः॥३६॥ श्रावणश्चाथवैशाखः कार्तिकः फाल्गुनस्तथा
मासेषुमार्गशीर्षश्चवास्तुकर्मणिशस्यते॥३७॥ वज्रव्याघातशूलानिव्यतिपातातिगंडको विष्कंभः
परिघोवर्ज्योवारेभौमश्चभास्करिः॥३८॥ इतिवास्तुप्रकरणम् आर्द्राशतभिषाश्लेषाविशाखा-
भरणीद्वयम् २ त्याज्याचद्वादशी१२ रिक्ता ४।९।१४ षष्ठी६ चंद्रक्षयो३० ष्टमी ८॥३९॥ प्रतिपच्चशनि
थिर्वारोत्याज्योशनिकुजौतथा सर्वदेवप्रतिष्ठास्यात्स्थिरलग्नो२।५।८।११ तरायणे॥४०॥ इतिदे-
वालयवापीकूपतडागादिप्रतिष्ठा विशाखाभरणीपूर्वाहियाश्लेषामघातथा ॥४१॥ गृहप्रवेशेवैशाखेमार्गपौषादिकास्त्वयः
ज्येष्ठोग्राह्यःस्थिरंलग्नं२।५।८।११ ग्राह्यःपक्षोबुधैःसितः॥४२॥ इतिगृहप्रवेशः अनुराधात्रयं३हस्तोमृगश्चैवादितिद्वयं२
यात्रायांरेवतीशस्तानिंद्यार्द्राभरणीद्वयम् २॥४३॥ मघोत्तरा३ विशाखाश्चसर्पाश्चान्येचमध्यमाः षष्ठी६ रिक्ता४।९।१४ द्वादशीच१२ प
र्वाणिच १५।३० विवर्जयेत्॥४४॥ लग्नेकन्या६ मन्मथश्च३ मकरश्च१० तुला ७ वृषः२ यात्राचंद्रबलेकार्याशकुनंचविचारयेत्॥४५॥
इतिगमननक्षत्राणि शनौचंद्रेत्यजेत्पूर्वांदक्षिणांचदिशंगुरौ सूर्येशुक्रेपश्चिमांचबुधेभौमेतथोत्तराम्॥४६॥ मंगलेमारुतेशूलेमी-

शानेबुधमंदयोः नैर्ऋत्येशुक्रसूर्याभ्यामाग्नेय्यांगुरुचंद्रयोः॥४७॥ ग्रंथांतरे इतिदिक्शूलम् प्रतिपदि१
नवम्यांच९ पूर्वस्यांदिशियोगिनी अग्निकोणेतृतीयायामेकादश्यांच३।११ संस्मृता॥४८॥ त्रयोदश्यांचपंच
म्यां१३।५ दक्षिणस्यांशिवप्रिया द्वादश्यांचचतुर्थ्यांच १२।४ नैर्ऋतेकोणगामिनी॥४९॥ षष्ठ्यांचैवचतुर्दश्यां
६।१४ पश्चिमायांचयोगिनी पूर्णिमायांचसप्तम्यां१५।७ वायुकोणेचपार्वती॥५०॥ दक्षिणस्यांद्वितीयाया२
१० मुत्तरस्यांशिवाभवेत् ईशानकोणेचाष्टम्यांतथादर्शेचयोगिनी ८।३०॥५१॥ इतियोगिनीचक्रम् योगि
नीक्रूरखदावामेपृष्ठेवांछितदायिनी दक्षिणेधनहंत्रीचसंमुखेमरणप्रदा॥५२॥ इतियोगिनीफलम् रू-

ईशान्य ८।३०	पूर्व· १।९	अग्नि ३।११
उत्तर· २।१०	योगिनी चक्रम्	दक्षिण· ५।१३
वायव्य ७।१५	पश्चिम ६।१४	नैर्ऋत्य ४।१२

द्यास्यप्रतिपच्छ्रेष्ठा१ द्वितीया२ कार्यकारिणी आरोग्यदातृतीयाच३ चतुर्थी४ कलहप्रिया॥५३॥ पंचमी५ चश्रियोनित्यंषष्ठी६ चक-
लहप्रिया भक्ष्यपानसमायुक्तासप्तमी ७ सुखदासदा॥५४॥ अष्टमी ८ व्याधिदानित्यंनवम्यां९ मरणंध्रुवम् दशमीभूरिलाभाय१० ए-
कादश्यपि११ हेमदा॥५५॥ द्वादशी१२ प्राणसंदेहासर्वसिद्धात्रयोदशी१३ शुक्लावायदिवाकृष्णावर्जनीयाचतुर्दशी १४॥५६॥ पूर्णिमा
याममायांच१५।३० प्रस्थानंनैवकारयेत् तिथिक्षयेचमासांतेग्रहणांतेदिनत्रये॥५७॥ इतियात्रातिथिः नैर्ऋत्येरविवारेचसोमेचै-
वोत्तरेतथा आग्नेय्यांभौममवारेतुपश्चिमेबुधएवच॥५८॥ ईशान्येगुरुवारेचशुक्रेचदक्षिणेतथा राहोश्चशनिवायव्येराहुचक्रंप्र-

कीर्तितम् ॥५९॥ ग्रंथांतरे अष्टस्रुप्रहरार्द्धेषु ८ प्रथमाद्येषहर्निशम् पूर्वस्यांवामतोराहुस्तुर्यांतुर्यां४दिशंव्रजेत् ॥६०॥ राहुः प्राच्यांततो

ईशान्य· ३	पूर्व· १	आग्नेय· ६
उत्तर ७	राहुचक्रम्	दक्षिण ३
वायव्य २	पश्चिमे ५	नैर्ऋत्य ८

वायुदक्षिणेशानपश्चिमे अग्नावुत्तरेनैर्ऋत्यां प्रहरार्द्धंचतिष्ठति ॥६१॥ ग्रंथांतरे यात्रायांदक्षिणेराहुर्योगिनीवामतःशुभा इतिराहुयोगिनीचंद्रफलम् चंद्रश्चरतिपूर्वादिक्रमेणादिक्चतुष्टयम् ४ मेषादिकेषु१ यात्रायांसंमुखश्चैवशोभनः ॥६२॥ मेषेच१सिंहे५धन९ पूर्वभागेवृषेचकन्या६मकरेच१० याम्यां मिथुने३तुले७कुंभ११तः पश्चिमायांकर्का४लि८मीने१२चनयोत्तरस्याम् ॥६३॥ सन्मुखश्चार्थलाभायदक्षिणेसुखसंपदः पृष्ठतोमरणंदद्याद्वामेचंद्रधनक्षयः ॥६४॥ ग्रंथांतरे इतिचंद्रफलम् यामयुग्मेषुरात्रौच२वामेपूर्वादिगोरविः यात्रास्मिन्दक्षिणेवामेप्रवासेपृष्ठकेद्वयम् २ ॥६५॥ इतिरविचारः सूर्यभाद्दश१० पश्च६चतुर्थे४चांके९ त्रयोदशे१३ विंशतिश्च२०रवेर्योगाः षट्कुजोंगस्यनाशकः ॥६६॥ सूर्यनक्षत्राद्गणनीयम् १०।६।४।९।१३।२० इतिरवियोगात्सर्वकार्यसिद्धिः मनु१४भानु१२दिशः१०सर्प८वेदा४श्विनः२क्रमात् रविवारान्मुहूर्तोयंकुलिकोनिंदितःशुभे ॥६७॥ इतिमुहूर्तकुलिकः गतानाड्योद्विगुणिता२पंच५भिश्चविभाजिताः सूर्य१शुक्र२बुधा३श्चंद्रो४ मंद ५·जीव६कुजाः७क्रमात् ॥६८॥ योवारोयत्रदिवसेनदादोगणयेत्क्रमात् शुभग्रहस्यशुभदोमुहूर्तोन्यस्यदुःखदः ॥६९॥ इतिमुहूर्तदेवता तिथिर्वारश्चनक्षत्रंनामाक्षरसमन्वि १

तम् द्वि२त्रि३चतु४र्भिर्गुणितंरस६सप्ता७ष्ट८भाजितम् ॥७०॥ आदिशून्ये१ भवेद्धानिर्मध्यशून्ये२रिपोर्भयं अंत्यशून्ये३भवेन्मृत्युःसर्वांकेविजयीभवेत् ॥७१॥ इतिसर्वांकयोगः शशिप्रवाहेगमनादिनस्तंसूर्यप्रवाहेनहिकिंचनोपि प्रष्टुर्जयःस्याद्वहिर्मानभोगोरिक्तेन्चभागेविफलंसमस्तम् ॥७२॥ इतिरविचंद्रनाडिकाफलम् दक्षिणेदुःखदःशुक्रःसंमुखेहंतिलोचनम् वामेपृष्ठेशुभोनित्यंरोधयेदस्तगःशुभम् ॥७३॥ इतिशुक्रदोषगुणाः विद्यारंभेगुरुःश्रेष्ठोमध्यमोगुरुभार्गवो अनभ्यासेबुधेचंद्रेजाड्यं-

पु·	पूभा	उ	स्वा	श्रव	अ·	ह	उ·	श्री
उ·	मृः	अनु	आ·	रेव	नं·चंद्र	धृ·		शु·

मृत्युःशनौकुजे ७४ इतिधनुर्विद्यारंभः पुष्योभाद्रपदायुग्मं२स्वातीचश्रवणाश्विनी हस्तोत्तरा३मृगोमैत्रंतथाश्लेषाचरेवती ॥७५॥ ग्राह्यानिभानिचेतानिक्रयविक्रयणेबुधैः चंद्रभार्गवजीवाश्चवाराःशकुनमुत्तमम् ॥७६॥ इतिक्रयविक्रयः हस्तादिपंच५पूषाश्विधनिष्ठासुचकांचनम् रक्तंपारिद

हस्त	चि·	स्वा·	वि·	अनु·	रेव·	अ	धनि	न
सू·	मं	बृह·	शुक्र	वार	वस्त्र	सुव·	चूडा	कर्म·

ध्येद्वस्त्रंभौमार्कगुरुभार्गवे ॥७७॥ इतिरक्तवस्त्रसुवर्णचूडादिपरिधानम् धनिष्ठापंचकंत्याज्यं५तृणकाष्ठादिसंग्रहे सव्यदक्षिणदिग्यात्रागृहाणांछादनंतथा ॥७८॥ धनिष्ठाधननाशायशतभिषाप्राणसंशयः पूर्वायांराजदंडश्चउत्तरामरणंध्रुवम् ॥७९॥ अग्निदाहश्चरेवत्यामेतेषांपंचवर्जिताः अदितित्रिषुयुग्मेषु१।३विशाखारोहिणीषुच ॥८०॥ प्रेतका

श्री·बो·
१२

र्यंप्रकुर्वीतमूलार्द्राभरणीषुच अश्विनीपुष्यहस्तश्चस्वातिश्रवणरेवती॥८१॥ज्येष्ठाप्रेतक्रियाकार्यारविवारंविनाबुधैः प्रेत-
क्रियानकर्तव्यायमलेच२त्रिपुष्करे॥८२॥आर्द्रामूलानुराधास्रुमिश्रक्रूरध्रुवेषुच ग्रंथांतरेइतिपंचकम् तैलाभ्यंगेरवौतापं
सोमेशोभाकुजेमृतिः बुधेधनंगुरौहानिः शुक्रेदुःखंशनौसुखम्॥८३॥रवौपुष्पंगुरौदूर्वाभौमवारेचमृत्तिका शुक्रेतुगो
मयंदद्यात्तैलाभ्यंगेनदोषभाक्॥८४॥ इतितैलाभ्यंगः हस्तत्रये३ब्रह्मयुग्मे२मघायांपुष्येधनिष्ठाश्रवणोत्तरासु३ मूला-
नुराधाद्वयरेवतीषुस्थिरेषुलग्नेषु२।५।८।११वधूप्रवेशः॥८५॥ सूर्येरोगःकुजेमृत्यु
र्वैधव्यंचबुधंस्मृतम् जीवशुक्रोर्किचंद्रेषुप्रवेशेसंपदेवधूः॥८६॥ इतिवधूप्रवेशः आ
श्लेषाद्वितयं२स्वातीरोहिणीचपुनर्वसुः रोगिस्नानंरेवतीचवर्जयेदुत्तरात्रयम्३॥८७॥
रिक्तातिथि४।९।१४श्चरेलग्ने१।४।७।१० वारेचरविभौमयोः स्नानंचरोगिणांप्रोक्तंद्विजभो

ह·	चि	स्वा	रो·	मृ·	म·	पु·	ध·	श्र·
पु·३	मू·	अ·	अ·	रे·	न·	२	५	८
११	ल	चंद्र	बृह	शु·	श·	वार	श्रे	मु·

जनसंयुतम्॥८८॥ इतिरोगिस्नानम् आनंदःकालदंडश्च१।२धूम्राक्षो३ थप्रजापतिः ४ सौम्यो५ ध्वांक्षो६ध्वजश्चैव७ श्रीवत्सो
८ वज्र९ मुद्गरो१०॥८९॥ छत्रं११ मैत्रं१२ मानसंच१३ पद्माख्यो१४ लंबक१५ स्तथा उत्पात१६ मृत्यु१७ काणश्च१८ सिद्धि१९ श्चा १२
थशुभो२० मृतिः २१॥९०॥ मुसलो२२ गद२३ मातंगो२४ राक्षसश्च२५ चरः२६ स्थिरः२७ वर्द्धमानश्च२८विज्ञेयाअष्टविंशतिरि-

त्यमी ॥९१॥ फलेस्वनामसदृशायोगादैवज्ञभाषिताः अश्विनीरविवारेचयोगोह्यानंदसंज्ञकः॥९२॥ मृगशीर्षेशीतरश्मावाश्ले-
षाक्षितिनंदने बुधेहस्तोनुराधाचदेवराजपुरोहिते॥९३॥ भार्गवेचोत्तराषाढाशनौशतभिषायदि तदानंदाख्ययोगःस्यात्काल

र	अ	भ	कृ	रो	मृ	आ	पु	पुः	आ	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	अ	श्र	ध	श	पू	उ	रे
चं	मृ	आ	पु	पुः	आ	म	पू	उ	ह	चि	स्वा	वि	अ·	ज्ये·	मू·	पू	उ	अ	श्र	ध	।श·	पू·	उ	रे	अ·	भ	कृ	रो·
मं·	आ	म·	पू	उ	ह·	चि	स्वा	वि	अ	ज्ये	मू·	पू	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ	रो	मृ	आ	पु	पुः
बु·	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ·	रो	मृ	आ	पु	पुः	आ·	म	पू	उ
बृ·	अ	ज्ये	मू·	पू	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ	रो	मृ	आ	पु	पुः	आ	म	पू	उ	ह	चि	स्वा	वि
शु·	उ	अ	श्र	ध	श	पू	उ	रे	अ	भ	कृ	रो	मृ	आ	पु	पुः	आ	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू·	पू
श	श	पू	उ	रे	अ	भ	कृ	रो	मृ	आ	पु	पुः	आ	म	पू·	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू·	उ	अ	श्र	ध·
वार	आ-नंद	का-लदं	धू-म्रा	प्र-जा	सौ-म्य	ध्वां-क्ष	ध्व-ज	श्री-वत्स	व-ज्र	मु-द्गरः	छ-त्रः	मै-त्रः	मा-नसः	पद्मा-क्ष·	लुं-बक	उत्पा-त	मृ-त्युः	का-णः	सि-द्धाः	शु-भः	मृ-तिः	मुस-लः	ग-दः	मातं-ग	राक्ष-स	च-र	स्थि-र	वर्ध-मान

दंडादयः क्रमात् ॥ ९४ ॥ इतिनक्षत्रवारेषानंदादियोगाः हस्तः सूर्येमृगःसोमेवारेभौमेतथाश्विनी बुधेमैत्रंगुरौपुष्योरेवतीभृगुनंदने ॥ ९५ ॥ रोहिणीसूर्यपुत्रेचसर्वसिद्धिप्रदायकः असावमृतसिद्धिश्चयोगःप्रोक्तःपुरातनैः ॥ ९६ ॥ इतिअमृतसिद्धियोगः विशारवादिचतुष्केच ४ सूर्यवारक्रमेणच उत्पातमृत्यूकाणश्च ३ सिद्धि ४ श्चाथशुभोभवेत् ५ ॥ ९७ ॥ इतिउत्पातमृत्युकाणसिद्धियोगाः तिथ्यंकेनसमायुक्तोवारांकोयदिजायते त्रयोदशांकः क्रकचो १३ योगोनिंद्यस्तदाशुभे ॥ ९८ ॥ इतिक्रकचयोगः मघासूर्येविशारवेचंद्रेभौमेचार्द्रानलोगुरौ बुधेमूलंविधिःशुक्रेयमघंटःशनौकरः ॥ ९९ ॥ यमघंटगते मृत्युःकुलच्छेदंकरग्रहे कृतेमृत्कः प्रतिष्ठायांशिशुर्जातोनजीवति ॥ १०० ॥ इतियमघंटयोगः

सू	चं	मं	बु	गु	शु	श॰
ह	मृ	अ	अनु	पु॰	रे	रो

सू	चं	मं	बु	गु	शु	श	वार
वि	पू	ध	रे	रो	पुः	उ	उत्पात
अ	उ	श	अ	मृ॰	आ॰	ह	मृत्कः
ज्ये	अ	पू	भ	आ	म॰	वि	काणः
मू॰	श्र	उ	कृ॰	पु	पू	स्वा	सिद्धिः

र	चं	मं	बु	गु	शु	श॰	र	चं	मं	बु	गु	शु	श॰
१२	११	१०	९	८	७	६	म॰	वि	आ	पू॰	कृ॰	रो	ह

नंदासूर्येमंगलेचभद्राभार्गवचंद्रयोः बुधेजयागुरौरिक्ताशनौपूर्णाच मृत्कदा १ इतिमृत्कयोगः

र	चं	मं	बु	गु	शु	श॰		र	चं	मं	बु	गु	शु	श॰
१ ६ ११	२ ७ १२	१ ६ ११	३ ८ १३	४ ९ १४	२ ७ १२	५ १० १५		० ०	० ०	३ ८ १३	२ ७ १२	५ १० १५	१ ६ ११	४ ९ १४

प्रोक्ताचभार्गवेनंदाभद्रासौम्येप्रकीर्तिता जयाभौमेशनौरिक्तागुरौपूर्णाचसिद्धिदा २ ग्रंथांतरे इतिसिद्धियोगः अंधाक्ष १ श्चिपटाक्षश्च २ काणाक्षो ३ दिव्यलोचनः ४ गणयेद्रोहिणीपूर्वंसप्त ७ वारमनुक्रमात् २ अंधेचोरहृतं द्रव्यंलभेद्यत्नात्तुकेकरे काणाक्षेश्रवणंयातिदिव्यनेत्रेनकिंचन ३ अंधेचलभतेशीघ्रंकाणेचैवदिनत्रयम् ३ चिपटेमासमेकंतु १ फलोनेचनलभ्यते ४ अंधेपूर्वेचगच्छंतिकाणेचैवतुदक्षिणे चिपटेपश्चिमायांतुफलोचैवउत्तरे ५ इत्यंधादिनक्षत्राणि पुनर्वसूकमृगश्चार्द्राज्येष्ठामैत्रंकरस्तथा पूर्वाषाढोत्तराषाढेमूलंदक्षिणचारिणः ६ अश्विनीभरणीस्वातीविशारवाफाल्गुनीद्वयम् २ मघाभाद्रपदायुग्मंनवचोत्तरचारिणः ७ कृत्तिकारोहिणीपुष्यंश्चित्राश्लेषाचरेवती शतंधनिष्ठाश्रवणोनवमध्यमचारिणः ८ इतिदक्षिणोत्तरमध्यमचारिनक्षत्राणि फ्रमत्यैंद्रींदिशंवत्सोमासानांचत्रिकं ३ त्रिकं ३ आदौभाद्रपदंकृत्वासव्यतोदिक्चतुष्टयम् ४ ९ यात्राविवादसंबंधद्वारंचगृहहर्म्ययोः भूपतेर्मीलनंयुद्धंवत्सस्याभिमुखंत्यजेत् १० इतिवत्सवासः त्रयंयमे ३ श्वे ३ चाग्नौषट् ६ विधौपंच ५ मृगेत्रयम् ३ एकमार्द्राकृनक्षत्रं १ चत्वारिचपुनर्वसौ ४ । ११ पुष्य ३ त्रयंरसाःसार्पे ६ मघायांभानिपंचच ५ पूर्वाचोत्तरफाल्गुन्योर्द्वयंहस्तेषुपंचच १२ चित्रास्वात्योरेकमेक १ चतुष्कंचद्विदैवते ४ त्रयंस्यादनुराधायां ३ ज्येष्ठायांचत्रयंस्मृतम् ३ । १३ मूलंरु-

रो	पुः	उ	चि	पू॰	ध	रे	अंध
मृ॰	आ	ह	अ	उ	श	अ	चिपट
आ	म	चि	ज्ये	अ	पू॰	भ	काण
पु	पू	स्वा	मू	श्र	उ	कृ	दिव्य

पु	मृ	आ	ज्ये	आ	ह	पू	उ	मू	दक्षि-
अ	भ	स्वा	वि	पू॰	उ	म	पू	उ	उत्तर
कृ	रो	पुः	चि	आ	रे	श	ध	श्र	मध्य

द्वा११ श्चतुष्कंचपूर्वाषाढेतथोत्तरे४ त्रयंचाभिजितिप्रोक्तं३ श्रवणेचत्रयं३ तथा १४ धनिष्ठायांचचत्वारि४ शतंशतभिषाकृच१००
द्वयं२ द्वयं२ भाद्रयोश्चद्वाविंशदपिचांतिमे३२ १५ इतिनक्षत्रतारासंख्या लग्नेष्टमे१।८व्यये१२ सूर्येक्षेत्रपालस्यदूषणम् आकाश-
देव्याश्चंडेतु लग्नं१ षष्ठे६ष्टमे८ व्यये१२ १६ द्वादशे१२ दशमेभौमः१० शाकिन्यादूषणंस्मृतम् वनदेव्याभवेद्दोषोद्वादशे१२ सप्तमे
बुधे७।१७ जामित्रे७ द्वादशे७ जीवेदेवदोषोनिगद्यते अस्ते७ व्यये१२ दैत्यपूज्ये जलदेव्याश्चदूषणम् १८ शनेश्चरेव्यये१२ चास्ते
७ दोषः स्यादात्मवातजः जामित्रे७ द्वादशे१२ राहोःकुगनिर्ज्ञातिदूषणम् १९ पितृदोषोभवेन्मेषे१ क्षुधाहानिर्विवर्जिता वृषे२ ग-
गनदेव्याश्चज्वरोदुःस्वप्ननेत्ररुक् २० मिथुने२ चमहामायादोषोवेलाज्वरोनिलः कर्केच४ शाकिनीदोषोहास्यरोदनमौनता २१
सिंहे५ जलेप्रेतदोषोदिवाशीतज्वरोरुचिः ग्रहदोषश्चकन्यायांक्रोधालस्याशुचिर्यथा २२ क्षेत्रपालभवोदोषस्तुलेसंतानपीडनं
७ वृश्चिके८ नागदोषश्चज्वालादेहेकुबुद्धिता २३ चापे९ देहेभवेद्दोषोज्वरःशोकोदरव्यथा मकरे१० चंडिकादोषोदेहभंगोज्वरोनि-
लः २४ मलिनप्रेतदोषश्चकुंभेदेहस्यपीडनम् ११ मीनेच१२ योगिनीदोषोज्वरोजंजालदर्शनम् २५ व्यये१२ धर्मे९ तृतीयेच३ षष्ठे
६ पापग्रहोयदा हतोगरेजलेशस्त्रेनस्यदोषःकुलोद्भवः २६ शनौजलेकुजेशस्त्रेगरेसूर्येस्ववंशजः राहौचविकृतोनष्टःशांतिपू- १४
जाद्विजार्चनम् २७ स्वक्षेत्रेगोत्रजोदोषःपरक्षेत्रेपरोद्भवः शत्रुक्षेत्रेशत्रुदोषोमित्रेस्वजनसंभवः २८ इतिदोषज्ञानम् आदित्ये-

चाश्विनीहस्तोमूलंपुष्योत्तरात्रयम्३ सिद्धियोगोधनिष्ठाचतिथिरप्यष्टमी८ तथा २९ सूर्येविशाखाभरणीज्येष्ठामैत्रंमघातथा च-
तुर्दशी१४ द्वादशीच१२ विरुद्धासप्तमी७ तिथिः ३० सोमेपुष्योनुराधाचश्रवणोरोहिणीमृगः नवमी९ दशमी१० चापिसिद्धियोगाः प्र
कीर्तिताः ३१ चंद्रेचित्राविशाखाचतथाषाढाद्वयं२ बुधैः एकादशीतथा११ षष्ठी६ वर्जनीयात्रयोदशी १३ ३२ भौमेमूलाश्विनीसार्पमृ-
गश्चोत्तरभाद्रपात् सिद्धाष्टमी८ तृतीयाच३ सप्तमीच७ त्रयोदशी१३ ३३ निंद्याशतभिषार्द्राचधनिष्ठापूर्वभाद्रपात् मघाचोत्तरा-
षाढाचद्वितीया२ दशमी१० कुजे ३४ बुधेनुराधापुष्यश्चकृत्तिकारोहिणीमृगः सिद्धियोगोद्वादशीच१२ द्वितीया२ सप्तमी७ तिथिः
३५ बुधेमूलधनिष्ठाचरेवतीचाश्विनीयमः तृतीयानवमी३।९ चापिवर्ज्याप्रतिपदा१ तिथिः ३६ गुरौपुष्योविशाखाचमैत्रंपूषापु-
नर्वसुः सिद्धियोगः पूर्णिमाच१५ दशमी१० पंचमी५ तिथिः ३७ जीवेशतभिषार्द्राचकृत्तिकोत्तरफाल्गुनी विधिर्मृगोष्टमी८ ष
ष्ठी६ चतुर्थी४ चविवर्जिता ३८ शुक्रेचित्रार्यमापूषाश्रवणाश्वोपुनर्वसुः सिद्धाचैकादशी११ षष्ठी६ प्रतिपच्च१ त्रयोदशी१३ ३९ भा-
र्गवेरोहिणीपुष्योज्येष्ठाश्लेषामघातथा द्वितीया२ सप्तमी७ चापिवर्जनीयासदाबुधैः ४० शनौचरोहिणीस्वातिःश्रवणःपूर्वफाल्गु
नी मघाचनवमी९ सिद्धाचतुर्थीच४ चतुर्दशी१४ ४१ शनौहस्तोत्तराषाढेचित्राचोत्तरफाल्गुनी रेवतीचसदावर्ज्यातिथिः षष्ठी६
चसप्तमी७ ४२ इतितिथिवारनक्षत्रशुभाशुभयोगः चरंचलंस्मृतंस्वातीपुनर्वसुश्रुतित्रयम्३ क्रूरमुग्रंमघापूर्वतृतीयं३ भर-

णीतथा ४३ ध्रुवंस्थिरंविनिर्दिष्टंरोहिणीचोत्तरात्रयम् ३ तीक्ष्णंदारुणमाश्लेषाज्येष्ठार्द्रामूलमेवच ४४ लघुक्षिप्रंस्मृतंपुष्योहस्ता
श्विन्यभिजित्तथा मृदुमैत्रंस्मृतंचित्राऽनुराधारेवतीमृगः ४५ मिश्रंसाधारणंप्रोक्तंविशाखाकृत्तिकातथा नक्षत्रेषुशुभकर्माणितन्ना-
मतुल्यानिकारयेत् ४६ इतिनक्षत्रसंज्ञा शनिचक्रंनराकारंलिखेद्यत्रशनिर्भवेत् तन्नक्षत्रंमुखे
दत्वायावन्नामनरस्यच ४७ नावद्विचारयेत्तत्रज्ञेयंशुभमथाशुभम् एकंमुखेचनक्षत्रं१ चत्वारि
दक्षिणेकरे४ ४८ त्रयंत्रयं३ पादयोश्चवामहस्तेचतुष्टयम् ४ हृदिपंच५ त्रयं३ मौलौनेत्रेगुह्येद्वयं२ द्व
यम् २ ४९ हानिरास्येदक्षिणेहस्तेलाभोवामेचरोगता हृदिश्रीर्मस्तकेराज्यंपादेपर्यटनंसदा ५० नेत्रे
सुखंगुदेमृत्युःशनिचक्रंविचारयेत् जपपूजाद्विजार्चाभिः कल्याणंजायतेसदा ५१ इतिशनिचक्रं
मेषे१शनौगुर्जरेषुप्रभासेचार्बुदेवृषे२ मिथुनेजायतेपीडास्थलीमूलस्थलीषुच ५२ कर्के४ काश्मीर-
केबाधाशक्रप्रस्थेमृगाधिपे५।४ शनैश्चरेचकन्यायां६ मालवायांतिसंक्षयम् ५३ तुला७ वृश्चिक८ चा

पेषु९ यदियातिशनैश्चरः नवर्षतितदामेघाः पृथ्वीदुर्भिक्षपीडिता ५४ सुभिक्षंमकरे१० कुंभे११ जायतेबहुधाशनौ मीनेच१२ सर्व
लोकानांदुर्भिक्षेणाक्षयोभवेत् ५५ इतिशनिचारः यत्रमासेरवेर्वाराजायंतेपंचसंततम् ५ दुर्भिक्षंछत्रभंगश्चतदास्तेचमहद्भयं

५६ सोमस्यपंचवाराश्चेत्५ यत्रमासेभवंतिहि धनधान्यसमृद्धिश्चसुखंभवतिसर्वदा ५७ यत्रमासेमंगलस्यजायंतेपंच५ वा-
सराः रक्तेनपूरितापृथ्वीछत्रभंगस्तदाभवेत् ५८ बुधस्यपंचवाराःस्युः५ र्यत्रमासेनिरंतरम् प्रजानांसुखमत्यंतंसुभिक्षंच
प्रजायते ५९ यत्रमासेपंचवाराभवंतिचबृहस्पतेः५ विग्रहःपश्चिमेदेशेखड्गयुद्धंचजायते ६० शुक्रस्यपंचवाराःस्युः५ र्यत्रमासे
निरंतरम् प्रजावृद्धिःसुभिक्षंचसुखंतत्रप्रवर्तते ६१ शनेश्चपंचकं५ दृष्ट्वापातालेकंपतेफणी ईशान्येदेशभंगश्चवह्निदाहोमह-
र्घता ६२ इत्येकमासेपंचवारफलम् अंगुलोविंशतिःसूर्ये२० शंकुःसोमेचषोडश१६ भौमेपंचदशांगुल्यो१५ बुधवारेचतुर्दश१४
६३ त्रयोदशगुरोर्वारे१३ द्वादशार्कजशुक्रयोः१२ शंकोर्मूलेयदाच्छायामध्याह्नेचप्रजायते ६४ तदाचाभिजिताख्याचघटिकेका:
स्मृताबुधैः अत्रकार्याणिसर्वाणिसिद्धियांतिकृतानिच ६५ जातोभिजितिराजास्याद्व्यापारेसिद्धिरुत्तमा संग्रामेषुजयप्राप्तिःकृ-
षिश्चसफलाभवेत् ६६ इत्यभिजिन्मुहूर्तफलम् अर्थवृद्धिःफाल्गुनेस्याच्चैत्रेचतरुसंपदः वैशाखेविग्रहोराज्ञांज्येष्ठेवृष्टिश्चभू-
यसी ६७ आषाढेतूदितेशुक्रेजलंभवतिदुर्लभम् श्रावणेचपशोःपीडाभाद्रेधान्यसमृद्धयः ६८ आश्विनेसर्वसंपत्तिःशुभंका
र्तिकमार्गयोः पौषेमाघेछत्रभंगोयद्युदेतिभृगोःसुतः ६९ इतिशुक्रोदयफलम् पूर्ववायौहोलिकायांप्रजाभूपालयोःसुखम्
पलायनंचदुर्भिक्षंदक्षिणेजायतेध्रुवम् ७० पश्चिमेतृणसंपत्तिरुत्तरेधान्यसंभवः यदिखेचशिखावृष्टिर्दुर्गंराजाचसंश्रयेत्

७१ इतिहुताशनिफलम् एकादश्यां११ कार्तिकस्ययदिमेघः समीक्षते आषाढेचतदावृष्टिर्जायतेनात्रसंशयः ७२ मार्गशीर्षस्य
चाष्टम्यां८ दृश्यंतेविद्युतोयदा तदावृष्टिःश्रावणेचमासेसंजायतेध्रुवम् ७३ कृष्णपक्षेदशम्यांच१० वृष्टिःपौषस्यजायते तदा
भाद्रपदेमासेवृष्टिर्भवतिभूयसी ७४ वृष्टिश्चेन्माघसप्तम्यां७ ज्येष्ठेमूलेचवर्षति नक्षत्रेवारिवाहस्तुतदाग्नेःपूर्यतेमही ७५
पंचम्यांप्रथमेपक्षेश्रावणस्यचवर्षति पयोवाहस्तदाधान्यधाराव्याप्ताजलैरपि ७६ नभस्येकादश्यांकृष्णे११ यदारोहिणिनिर्म-
लः रविस्तदासुभिक्षंस्यात्पक्षिणांचक्षुधार्तिहृत् ७७ इतिवृष्टिफलम् आषाढपूर्णिमायांच१५ तन्नक्षत्रंविचारयेत् पूर्वा
षाढेसुभिक्षंस्यामूलेदुर्भिक्षमुच्चकैः ७८ उत्तराषाढकेस्वानांपीडाकटकसंगतिः विग्रहःसर्वलोकानांपीडिताःसकलाजनाः
७९ इत्याषाढपूर्णिमाफलम् ज्येष्ठस्यप्रथमेपादे१ प्रतिपद्यांयदाभवेत्१ रविवारस्तदावायुर्वातिवृक्षांतकारकः ८० अत्यं-
तविग्रहोभौमेबुधेदुर्भिक्षमुच्चकैः अनावृष्टिःशनेर्वारेजलंक्वापिनदृश्यते ८१ सोमशुक्रसुरेज्यानांयदिवारःप्रजायते धनधा-
न्यसुतोत्पत्तिर्गेहेगेहेमहोत्सवः ८२ इतिज्येष्ठप्रतिपत्फलम् पौषमासस्यसंक्रांतौरवेर्वारोयदाभवेत् धान्यस्यद्विगुणंमौ
ल्यंभौमवारेचतुर्गुणम् ८३ त्रिगुणंशनिवारेचबुधेशुक्रेसमंभवेत् सुराचार्येचसोमेचमौल्यमर्द्धसुनिश्चितम् ८४ इतिसं
क्रांतिफलम् मीने१२ संक्रमणेसूर्येवारेवातिसमीरणः भौमेपीडापशूनांचदुर्भिक्षंचशनैश्चरे ८५ संक्रांतौयदिमीनस्यबुध-

वारःप्रजायते छत्रभंगोमहामारीरोदनंभयचिंतना ८६ संक्रांतौसोमवारःस्यात्प्रजानांपरमंसुखम् भानुभौमार्किवारेषुपापसु
द्धमहर्घता ८७ संक्रांत्यधरनक्षत्रादासभावाधिगम्यते त्रिकं३ षट्कं६ त्रिकं३ षट्कं६ त्रिकं३ षट्कं६ पुनःपुनः ८८ पंथाभोगौ२ व्य-
था३ वस्त्रं४ हानि५ श्चविपुलंधनम्६ षट्कभागेफलंसर्वंमासिमासिविचारयेत् ८९ इतिमीनसंक्रांतिफलम् अथसंक्रांतिना
मानि ग्रंथांतरे मंदा१ मंदाकिनी२ ध्वांक्षी३ घोरा४ चैवमहोदरी५ मिश्रका६ राक्षसी७ ज्ञेयासंक्रांतिःसप्तधास्मृता ९० गुरुवा
रेभवेन्मंदा१ बुधेमंदाकिनीस्मृता२ घोराआदित्यवारेण३ महोदरीकुजेनतु४ ९१ ध्वांक्षीचैवतुचंद्रेण५ सूर्यपुत्रेणराक्षसी६
मिश्रकाभार्गवेचैव७ संक्रांतिःसप्तधाभवेत् ९२ मंदाचकुरुतेवृष्टिंमंदाकिस्तरुसंक्षयम्२ ध्वांक्षीचवहतेवायुं३ घोरासस्यभ-
यंकरी४ ९३ महोदरीचचौराणां५ जनपीडाचमिश्रका६ राक्षसीचभयंकुर्या७ त्संक्रांतिफलमादिशेत् ९४ इतिसंक्रांति-
फलम् ग्रंथांतरे राशिचक्रंलिखित्वादौमेषसंक्रांतिभादिकम्१ अष्टाविंशतिकं२८ तत्रलिखेन्नक्षत्रमंडलम् ९५ सिंधौ-
द्वयं२ द्वयं२ दद्यादन्यत्रैकैकमेवच चत्वारःसागरा४ स्तत्रसंधयश्चाष्ट८ संख्यया ९६ शृंगाणितत्रचत्वारि४ तदान्यष्टौस्मृतानि
च रोहिणीपतिनायत्रज्ञेयंतत्रशुभाशुभम् ९७ यतोजलमयस्यैषाचंद्रस्यपरमाप्रिया यत्रप्रजापतिर्ज्ञेयंचिंतनीयासदाबुधैः
९८ समुद्रेषुमहावृष्टिस्तटेवृष्टिश्चशोभना पर्वतेबिंदुमात्रासारकंडवृष्टिश्चसंधिषु ९९ इतिरोहिणीचक्रम् नराकारंलिखे

चक्रं सूर्यो यत्र व्यवस्थितः तन्नक्षत्रादिकं कृत्वात्र यंदद्याच्च मस्तके ३ २०० मुखे त्रयं ३ स्कंधयोश्च दद्याद्देकैकमेव च हस्तद्वयेरत



थेकैकं १ पाण्युरस्येकमेककम् १।१ हृदि पंच गुदे चैकं १ नाभौ चैकं १ प्रजायते जंघयोरेकमेकं च १ षडा ६ हुः पादयोर्द्वयोः २ मस्तके १७
पट्टबंधी स्यान्मुखे मिष्टान्नभोजिता स्कंधे गजस्कंधगामी बाहोः स्थानच्युतो भवेत् ३ पाणौ च जायते चोरो हृदये चेश्वरो भवेत् स्व

ल्पतोषी भवेन्नाभौ परदाररतो गुदे ४ जंघयोः परदेशी स्यादल्पायुश्च पदद्वये २ चक्रे च सूर्यनक्षत्राद्दात्मभावाधिपे गते ५
इति सूर्यनराकारचक्रम् ग्रामो यत्र भवेद्दक्षे तदाद्याः सप्त ७ मस्तके पृष्ठे सप्त ७ हृदि सप्त ७ पादे सप्त च ७ तारकाः ६ मस्त
के च धनी मान्यः पृष्ठे हीनश्च निर्धनः हृदये सुखसंपत्तिः पादे पर्यटनं फलम् ७ इति ग्रामवासफलम् मूले ष्टौ ८ मूलवृक्षस्य च घ
टिकाः परिकीर्तिताः स्तंभे षडाहुर्घटिका ६ स्त्वचि चैकादश स्मृताः ११ ८ शाखायां च नव ९ प्रोक्ताः पत्रे प्रोक्ताश्चतुर्दश १४ पुष्पं पं-
च ५ फले वेदाः ४ शिखायां च त्रयं ३ स्मृतम् ९ मूले नाशो हि मूलस्य स्तंभे हानिर्धनक्षयः त्वचि भ्रातुर्विनाशाय शाखायां मातृपीड
नम् १० परिवारक्षयं पत्रे पुष्पे मंत्री च भूपतेः फले राजा शिखायां स्यादल्पजीवी च बालकः ११ इति मूलवृक्षफलं रेवत्यादि मृगां
ते च यावत्तिष्ठति चंद्रमाः शुक्रे ताबद्भवेदंधः संमुखे दक्षिणेपि वा १२ प्राक्पश्चादुदितः शुक्रः पंच ५ सप्त ७ दिनं शिशुः विपरीतं
तु दृष्टव्यं तद्वद्देवगुरोरपि १३ मीने १२ मेषे १ तथा सिंहे ५ वृषे २ कन्या ६ तुल ७ कर्कटे ४ यदा शुक्रो भवेदंधः संमुखो दक्षिणेपि वा १४
ग्रंथांतरे इति शुक्रोदयास्तफलम् तृतीये ३ दशमे १० षष्ठे ६ सदा सूर्यः शुभावहः प्रथमे १ दशमे १० षष्ठे ६ तृतीये ३ सप्तमे ७ शशी
१५ शुक्लपक्षे द्वितीयश्च २ पंचमो ५ नवमः ९ शुभः ताराः शुभप्रदाः सर्वास्त्रि ३ पंच ५ सप्त ७ वर्जिताः १६ यदि स्यात्सबलश्चंद्र-
स्तथापि क्लेशदायिनी तृतीया ३ पंचमी ५ तारा सप्तमी च ७ नृणां भवेत् १७ जन्मर्क्षं गणयेदादौ दिनऋक्षं च जायते नवभिस्तु ९

हरेद्भागंशेषातारापकीर्तिता १८ जन्म१ संपत्२ विपत्क्षेम३ ४ प्रत्यरिः ५ साधको६ वधः७ मैत्रा८ निमैत्रा९ तारास्तुस्त्रिरावृत्यान
वैवाहि १९ त्रि३ षष्ठे६ दशमे१० भौमोराहुः केतुःशनिः शुभः षष्ठे६ष्टमे८ द्वितीयेच२ चतुर्थे४ दशमे१० बुधः २० द्वितीये२ पंचमे५
जीवः सप्तमे७ नवमे९ शुभः विहायशुक्रोदशमं१० षष्ठं६ चसप्तमं७ शुभः २१ एकादशे११ ग्रहाः सर्वेसर्वकार्येषुशोभनाः ग्रहाणां
चफलंज्ञेयंफलविज्ञैःशुभाशुभं २२ इतिगोचरफलम् दशम्या१० वधिकृष्णेतुपक्षेपूर्णोहिचंद्रमाः ततः परंक्षीणचंद्रः शुभकर्म
णिवर्जयेत् २३ इतिचंद्रफलम् पुनर्वसुद्वयं२ क्षौरेश्रुतित्रयं३ करत्रयं३ रेवतीद्वितयं२ ज्येष्ठामृगशीर्षश्चगृह्यते २४ क्षौरेप्राण
हरात्याज्यामघामैत्रंचरोहिणी उत्तरा३ कृत्तिकावाराभानुभौमशनैश्वराः २५ रिक्ता४।९।१४ हेयाष्टमी८ षष्ठी६ क्षौरेचंद्रक्षये३०
निशा संध्याविष्टयंतगंडांताभोजनांताश्चगोग्रहम् २६ इतिनित्यक्षौरम् रेवतीद्वितयं२ पुष्योरोहिण्यांमृगमैत्रयोः श्रवणोत्तर
३ शुक्रेषुराज्ञांस्यादभिषेचनम् २७ इतिराजाभिषेचनम् चित्रामृगानुराधासुस्वात्यांचश्रवणद्वये२ हस्तेपुष्येचरोहिण्यामः
श्विन्यासुत्तरात्रये३ २८ लग्नेस्थिरे२।५।८।११ राजयोगेलग्नेचबलसंयुते शुभेयोगेशुभेचंद्रेराज्ञांदर्शनमुत्तमम् २९ इ
तिराजदर्शनम् रेवतीगुरुलंज्येष्ठा२ मैत्रंहस्तत्रयं३ मृगः पुनर्वसुश्चविज्ञेयोगणस्तिर्यङ्मुखोबुधैः ३० वृक्षारोपंचवाणिज्यं
सर्वसिद्धिंचकारयेत् वाहनानिचयंत्राणिदमनंचविधीयते ३१ पूर्वात्रयं३ मघाश्लेषाविशाखाकृत्तिकायमः मूलंचाधोमुखो

ज्ञेयोनवकोयंगणोबुधैः ३२ भूकार्यमुग्रकार्यंचखननंविवरस्यच गुह्यंचाधोमुखंयच्चतत्कार्यंकारयेद्बुधः ३३ उत्तरात्रितयंपुष्यो-

रे	अ	ज्ये	अ	ह	चि	स्वा	मृ	पु	तिर्यङ्मुख
पू	पू	पू	म	आ	वि	कृ	भ	मू	अधोमुख
उ	उ	उ	पू	रो	आ	श्र	ध	श	ऊर्ध्वमुख

रोहिण्यार्द्राश्रुतित्रयम् ३ ऊर्ध्ववक्त्रगणोज्ञेयो नक्षत्राणांमनीषिभिः ३४ प्रासादि-
छत्रगेहादिप्राकारध्वजतोरणम् वनाभिषेकंमैत्रंचकुर्यादूर्ध्वमुखेगणे ३५ इति-
तिर्यङ्मुखाधोमुखोर्ध्वमुखनक्षत्राणि पुनर्वसुद्वयं२ पूषामृगश्चैवकरत्रयम् ३
मूलंश्रुतित्रयं३ मैत्रंभिषक्कर्मणिगृह्यते ३६ सोमसुक्रसुरेज्यानांवारःशकुनमुत्तमं
लग्नेषुचापमीनोच१२ वृषो२ ग्राह्यस्तुलाधरः ३७ इतिभैषज्यकर्म अमावास्याष्टमी३०।८ त्याज्यापूर्णिमाच१५ चतुर्दशी१४
रविवारोवर्जनीयोपशूनांचविनिर्गमे ३८ चित्रोत्तरा३ रोहिणीचश्रवणोपिविवर्जिताः एतेषुपशुजातीनामसुभंनिर्गमेभवेत्
३९ इतिपशुनिर्गमः उत्तरासु३ विशाखायांरोहिण्यांचपुनर्वसौ नवम्यांच९ चतुर्दश्यां१४ मष्टम्यां८ नानयेत्पशुम् ४० इति
पशुग्रहप्रवेशः पूर्वा३ मैत्रद्वयं२ मूलंवासवोरेवतीकरः पुनर्वसुद्वयं२ ग्राह्यंपशूनांक्रयविक्रये ४१ इतिपशुक्रयविक्रयः रो
हिण्युत्तर२ चित्रासुमैत्रेपुष्येकरेमृगे रेवत्यांवारुणेचाश्वेद्विदैवेशुभवासरे ४२ स्थिरेलग्ने२।५।८।११ शुभंप्रोक्तंवल्लीवृक्षा
दिरोपणम् इतिवल्लीवृक्षादिरोपणम् नंदातिथिश्चनामादौ१।६।११ पूर्णानांचतथांतिके५।१०।१५ घटिकैका१ शुभेत्या-

ज्यानिथिगंडोयमुच्यते ४३ ज्येष्ठाश्लेषारेवतीनामंतेचघटिकाद्वयम् २ आदौमूलमघास्वानांभगंडोघटिकाद्वयम् २। ४४ मीन१२ वृश्चिक ८ कर्कांते ४ घटिकार्द्धपरित्यजेत् आदौमेषस्य१ चापस्य९ सिंहस्य ५ घटिकार्धकम् ४५ तिथिगंडेभगंडेचलग्नगंडेचजातकः नजीवतितदाजातोजीवन्नेषोऽधनीभवेत् ४६ इतित्रिविधगंडांतफलम् गंडांतस्त्रिविधस्त्याज्योनक्षत्रतिथिलग्नगः नव९ पंच५ चतुर्थ्यंते ४ द्वेकार्द्धघटिकामताः ४७ ग्रंथांतरे सप्तम्यांच ७ रवेर्वारोबुधस्यप्रतिपद्दिने संवर्ताख्यस्तदायोगोवर्जितव्यःसदाबुधैः ४८ इतिसंवर्त्तकयोगः नंदाशुक्रे १।६।११ बुधेभद्रा २।७।१२ शनौरिक्ता ४।९

कृष्णपक्षः					
१	बालव	कौलव	९	तैतिल	गरज
२	तैतिल	गरज	१०	वणिज	विष्टिः
३	वणिज	विष्टिः	११	बव	बालव
४	बव	बालव	१२	कौलव	तैतिल
५	कौलव	तैतिल	१३	गरज	वणिज
६	गरज	वणिज	१४	विष्टि	शकुनि
७	विष्टि	बव	३०	चतुष्पद	नाग
८	बालव	कौलव	०	०	०

शुक्लपक्षः					
१	किंस्तुघ्न	बव	९	बालव	कौलव
२	बालव	कौलव	१०	तैतिल	गरज
३	तैतिल	गरज	११	वणिज	विष्टिः
४	वणिज	विष्टि	१२	बव	बालव
५	बव	बालव	१३	कौलव	तैतिल
६	कौलव	तैतिल	१४	गरज	वणिज
७	गरज	वणिज	१५	विष्टिः	बव
८	विष्टिः	बव	०	०	०

१४ कुजेजया ३।८।१३ गुरौपूर्णा ५।१०।१५ तिथिर्ज्ञेयासिद्धियोगाः प्रकीर्तिताः ४९ इतिसिद्धियोगः विष्कंभः १ प्रीति २ रायुष्मान् ३ सौभाग्यः ४ शोभन ५ स्तथा अतिगंडः ६ सुकर्माच ७ धृतिः ८ शूल ९ स्तथैवच २५० गंडो १० वृद्धि ११ र्ध्रुव १२ श्चैवव्याघातो १३ हर्षण १४ स्तथा वज्रं १५ सिद्धि १६ र्व्यतीपातो १७ वरीयान् १८ परिघः १९ शिवः २० ५१ सिद्ध २१ साध्यः २२ शुभः २३ शुक्लो २४ ब्रह्मा २५ ऐंद्रो २६ थवैधृतिः २७ सप्तविंशतिराख्यातानामतुल्यफलाअमी ५२ इतिविष्कंभादियोगाः बवश्च १ बालवश्चैव २ कौलव ३ स्तैतिलस्तथा ४ गरश्च ५ वणिजो ६ विष्टिः ७ सप्तैतानिचराणिच ५३ कृष्णपक्षेचतुर्दश्यां १४ शकुनिः पश्चिमेदले १ चतुष्पादश्च २ नागश्च ३ त्वमास्या ३० दलद्वये २ ५४ शुक्लप्रतिपदायाश्च १ किंस्तुघ्नःप्रथमेदले १ स्थिराण्येतानिचत्वारि ४ करणानिजगुर्बुधाः ५५ शुक्लप्रतिपदांतेच १ बवाख्यःकरणोभवेत् एकादशैव ११ ज्ञेयानिचरस्थिरविभागतः ५६ गततिथिंद्विगुणीकृत्य २ हीनामेकेनकारयेत् १ सप्तभिश्चहरेद्भागं ७ शेषंकरणमुच्यते ५७ इतिकरणानि दस्रो १ यमा २ नलो ३ धाता ४ चंद्रो ५ रुद्रो ६ दिति ७ र्गुरुः ८ भुजंगमश्च ९ पितरो १० भगो ११ र्यम १२ दिवाकराः १३ ५८ त्वष्टा १४ वायुः १५ शक्रवह्नी १६ मैत्रः १७ शक्रश्च १८ निर्ऋतिः १९ जलं २० विश्वे २१ विधि २२ र्विष्णु २३ र्वासवो २४ वरुण २५ स्तथा ५९ अजैकपाद २६ र्हिर्बुध्न्यः २७ पूषेति २८ कथिताबुधैः अष्टाविंशतिसंख्यानांनक्षत्राणामधीश्वराः २६० इतिनक्षत्राधिपतयः इतिश्रीकाशिनाथभट्टाचार्यकृतेशीघ्रबोधेमुहूर्तप्रकरणं

द्वितीयम् २ शिरोमुखंकर्णनेत्रंस्पृष्ट्वापृच्छतिचेज्जनः सुवर्णधनधान्यानांलाभस्तस्यनसंशयः १ स्कंधग्रीवाकंठहस्तस्प
र्शेलाभोहिदुःखतः कुक्षिनाभिसमालंभेभक्ष्यपानादिसिध्यति २ जंघालिंगकटिस्पर्शेकन्यालाभःसुतोद्भवः जानुगुल्फ
पदस्पर्शेमहाक्लेशःप्रजायते ३ केशस्पर्शेभवेन्मृत्युःफलादिस्पर्शनेशुभम् तृणांगारकसंस्पर्शेकार्यसिद्धिर्नजायते ४ काष्ठ
गंधघटस्पर्शेगृहपीडामनोभवेत् मृगारामान्नभांडादिस्पर्शेसिद्धिश्चजायते ५ शून्यालयेस्मशानेचशुष्ककाष्ठक्षतेतरो गु
ल्मवस्त्राधमस्थानेप्रश्नेक्लेशःप्रजायते ६ देवगेहेनदीकूलेदिव्यस्थानेशुभंभवेत् सुखादिक्षुस्थितेसिद्धिर्विवादिष्वपिनजायते ७
इत्यंगविद्या तिस्रो३मीनेच१२मेषेच१ घट्यःपंच५श्रुतिः२पलाः चतस्रश्च४ वृषे२ कुंभे११ पलाःप्रोक्ताश्चषोडश१६ ८ मिथु-
ने३ मकरे१० पंचघटिकाविंशतिः२० पलाः२५ पंच५कर्के४चचापेच९शशि१वेदाः४ पलास्मृताः४१ ९ घटिकाःपंच५सिंहे५ऽलौ
८ द्वयं२ वेदाः४ पलाःस्मृताः४१ कन्यायांच६तुले७पंच५पलाश्चंद्र१स्तथाग्नयः३१ १० इतिलग्नप्रमाणम् ग्रंथांतरे वस्वेकप
क्षा२१८ वसुधाक्षपक्षा२५१ त्रिव्योमरामा३०३ गुणवेदरामाः३४३ सप्ताब्धिरामा३४७ वसुरामरामाः३३८ क्रमाक्रमान्नागपु
रेचनाड्याः ११ इतिनागपुरेलग्नघटी ग्रंथांतरे सूर्येधेनुश्चताम्रंचगोधूमारक्तचंदनम् चंद्रेशंखश्चचंदनंचसितवस्त्रंचतंदुलाः
१२ कुजेवृषःप्रदातव्योरक्तवस्त्रंगुडौदनम् बुधेकर्पूरकंमुद्गाहरिद्वस्त्रंहरिन्मणिः १३ पीतवस्त्रद्वयंजीवेहरिद्राचणकास्तथा अ

मे·	वृ	मि	क	सिं	क	तू	वृ	ध	म	कुं	मी	राशी
३	४	५	५	५	५	५	५	५	५	४	३	घटि
२५	१६	२०	४१	४२	३१	३१	४२	४१	२०	१६	२५	पला

मे	वृ	मि	क	सिं	क	तू	वृ·	ध	म	कुं	मी	लग्न
३	४	५	५	५	५	५	५	५	५	४	३	घटि
३८	११	३	४३	४७	३८	३८	४७	४३	३	११	३८	पला

श्वः शुक्रेसितोदेयःशुक्ल-
धान्यानियानिच १४ श-
नौतैलंनिलादेयाः कृष्णा
गौर्लोहमाषकम् राहोच
महिषीछागोमाषाश्चतिलसर्षपाः १५ अज मेषौचदातव्यौकेतौचान्नंचमिश्रितम् स्वर्णगोविप्रपूजाभिःसर्वेषांशांतिरुत्तमा
१६ इतिग्रहदानानि मेषेगुरौसुभिक्षंस्यात्सुवृष्टिश्चसुखीनरः वृषे२गुरौस्वल्पवृष्टिःप्रजापीडाचविग्रहः १७ अनावृष्टिः
प्रजानाशोरौरवंमिथुने३गुरौ कर्के४गुरावनावृष्टिर्देशभंगोमहर्घता १८ सिंहे५गुरौसुभिक्षंस्यात्सुवृष्टिश्चप्रजासुखम् क
न्या६गुरौरोगपीडादुर्भिक्षंसस्यजन्मच १९ तुले७गुरावल्पसस्यंबहुक्षीरंप्रजायते अलौ८जीवेचदुर्भिक्षंराजचोररुजाद्भयं
२० चापे९गुरौशुभावृष्टिःशुभंसस्यंसुखीजनः दुर्भिक्षंमकरे१०जीवेराजयुद्धंपशुक्षयः २१ कुंभे११गुरौसुभिक्षंचधातुमू-
ल्यमहर्घता दुर्भिक्षंदक्षिणेदेशेनान्यदेशेझषे१२गुरौ २२ इतिगुरुचारफलम मार्गकार्तिकसंक्रांतौवृष्टिर्वर्षतिमध्यमम् पौषे
माघेसुखंनृणांसस्यपूर्णावसुंधरा २३ चैत्रफाल्गुनवैशाखज्येष्ठानांसंक्रमेघनः यदिवर्षतिसर्वत्रसुभिक्षंचप्रजायते २४ आ-

षाढेसंक्रमेतृष्टेोव्याधिश्च श्रावणेरूरवम् भाद्रेचंबहवोरोगाः शुभंसर्वत्रचाश्विने २५ इतिसंक्रांतिवृष्टिफलम् चैत्रस्यशक्लपंच
म्यां ५ पूर्ववायुघनागमः भाद्रेगुणत्रयंमौल्यंसस्यानांजायतेतदा २६ ज्येष्ठस्यशुक्लपंचम्यां ५ दक्षिणेयदिमारुतः मेघगर्जस्तदा
भाद्रेतैलेमौल्यंगुणद्वयम् २७ आषाढेशक्लपंचम्यां ५ वृष्टिःपश्चिममारुतः तदाचतुर्गुणंमौल्यंधान्यानांकार्तिकेभवेत् २८ श्रा
वणेशुक्लपंचम्यां ५ वृष्टिर्वातोदिनद्वयम् २ दक्षिणेपश्चिमेज्ञेयं दुर्भिक्षंधान्यसंक्षयः २९ इतिशुक्लपंचमीफलम् आषाढपू-
र्णिमायांचे १५ दनिलोवातिनिर्ऋतौ अनावृष्टिर्धान्यनाशो जलंकूपेनदृश्यते ३० आषाढपूर्णिमायांतु १५ वायव्येयदिमारुतः मश
कामूषकाःकीटाजायंतेशलभाःशकाः ३१ आषाढपूर्णिमायांस्या १५ दुत्तरोयदिमारुतः धर्मशीलास्तदालोकाधनधान्यंगृहे-
गृहे ३२ आषाढपूर्णिमायांचे १५ दीशान्येयदिमारुतः रूग्विनोहितदालोकागीतवाद्यमहोत्सवाः ३३ वह्निकोणेवह्निभीतिःप
श्चिमेचजलाढ्यम् अन्यत्रयदिवायुःस्यात्रूभिक्षंजायतेतदा ३४ सर्वमासेपूर्णिमायांभूमिकंपोयदाभवेत् उल्कातारावज्र-
पातःपरिधिःशशिसूर्ययोः ३५ धूमकेतुःशक्रचापंग्रहणंबहुधातथा तदासकलवस्तूनांजायतेचमहर्घता ३६ इतिपूर्णिमा
फलम् आषाढस्शुक्लपक्षस्यद्वितीयायांचवर्षति २ यदिमेघस्तदावृष्टिःश्रावणेजायतेध्रुवम् ३७ तृतीयायां ३ पूर्ववायुःपूर्वेवाया
निवारिदः नवमेघास्तदाभाद्रेवर्षतिविपुलंजलं ३८ चतुर्थ्यां ४ दक्षिणेवायुर्मेघःपूर्वेचगच्छति आश्विनेचतदामासेवृष्टिर्भव-

तिनिश्चितं ३९ पंचम्यामुत्तरोवायुर्दृश्यतेचयदांबुदः तदाचकार्तिकेमासेवृष्टिर्भवतिनिश्चितम् ४० चतुष्टयेच ४ दिवसेयदावर्षतिवारि-
दः अतिवृष्टिंचदुर्भिक्षंजायतेनात्रसंशयः ४१ दिनद्वयं २ यदावातोवातिदक्षिणपश्चिमे तदानश्यंतिधान्यानिदुर्भिक्षंचप्रजायते ४२
तृतीयायांच ३ पंचम्यां ५ वायुःपूर्वोत्तरोयदि तदाधान्यानिजायंतेसर्वंकृतयुगोपमम् ४३ इतिआषाढशुक्लद्वितीयादिदिनचतुष्टयफलं
पौषेमूलभरण्यंतंचंद्रचारेणवर्षति आर्द्रादितोविशाखांतंसूर्यचारेणवर्षति ४४ यदितिष्ठतिभौमस्यक्षेत्रेकोपिग्रहस्तदा षण्मासं
तुषधान्यानांजायतेचमहर्घता ४५ शुक्रक्षेत्रेकुजेमासद्वयंनूनंमहर्घता चंद्रेचदिननाथेनसर्वरोगाशुभंसदा ४६ शनौराहौसर्वधा
न्यंमहर्घंराजविग्रहः बुधक्षेत्रेरवौचंद्रेविरोधःसर्वभूभृताम् ४७ उत्पत्तिस्तुषधान्यानांपंचमासंप्रजायते शुक्रक्षेत्रेबुधेचंद्रेचंद्र
क्षेत्रेभृगोःकृते ४८ पारवडानांभवेद्वृद्धिर्धान्यानांचमहर्घता ४९ बुधक्षेत्रेशनौचंद्रेससधान्यमहर्घता शुक्रक्षेत्रेगुरौभौमेकार्पा
सादिमहर्घता ५० भौमक्षेत्रेशनौराहौताम्रादीनांमहर्घता शनिक्षेत्रेशनौराहौरूभिक्षंचंद्रभास्करौ ५१ पशुनाशोधान्यवृ
द्धिर्गुडादीनांमहर्घता गुरुक्षेत्रेशनौराहौपशुनाशस्तृणक्षयः ५२ भौमेराज्ञांविरोधश्चबुधेवृष्टिश्चभूयसी भौमक्षेत्रेयदासं
निराहुभौमार्कभार्गवाः ५३ षण्मासं ६ गुडकार्पासघृतक्षीरमहर्घता मंदक्षेत्रेयदासंतिमंदराहुबुधास्तथा ५४ चतुष्पदानां
नाशश्चद्विपदानांचजायते भौमक्षेत्रेयदासंतिशुक्रभौमनिशाकराः ५५ तदामुक्तापशूनांचशरवस्यचमहर्घता भौमक्षेत्रे

भार्गवेचधान्यानांचमहर्घता ५६ शनिक्षेत्रेचंद्रसूर्यौवस्त्राणांचमहर्घता शुक्रेभौमेगुरुक्षेत्रेप्रजापीडाचजायते ५७ ग्रहरा
शिसमेयोगेफलमेतत्प्रकीर्तितम् इतिराशिग्रहयोगफलम् चंद्रोदयेकुजक्षेत्रेतुषधान्यसमृद्धये चंद्रोदयेभृगुक्षेत्रेस्वल्प
वृद्धिःक्रियादिके ५८ प्रजापीडाबुधक्षेत्रेसोमशुक्रोदयोभवेत् रविक्षेत्रेतुलावृद्धिःशनिसोमभृगूदये ५९ चंद्रक्षेत्रेसुक्र
चंद्रबुधानामुदयोभवेत् षण्मासं६स्याच्चदुर्भिक्षमतिवृष्टिश्चजायते ६० उदितौचबुधक्षेत्रेयदाराहुशनैश्चरौ पशुक्षयःप्र-
जापीडाधान्यानांचमहर्घता ६१ शुक्रक्षेत्रेसोमसूर्यसूर्यपुत्रोदयोभवेत् उदयास्तमनंपीडाजायतेचमहर्घता ६२ यदोदयः
शनिक्षेत्रेभौमभास्करयोर्भवेत् घृतानांचनवावृद्धिर्गुडानांरक्तवाससाम् ६३ यदासमुद्रेउदयंशानिक्षेत्रेशनैश्चरः तदाच-
तृणकाष्ठानांलोहानांचमहर्घता ६४ इतिग्रहोदयराशिफलम् गुरुर्यदाविशाखायांतदाधान्यमहर्घता मंगलेवर्षकाल-
श्चशनौसर्वत्रमंगलम् ६५ अग्निवर्णोयदार्द्रायांशनिरग्नेस्तदाभयम् बुधेभाद्रेचदुर्भिक्षंसुभिक्षंभृगुनंदने ६६ सुभिक्षं
चानुराधायांयदिशेषाग्रहाःस्थिताः कल्याणंचसुभिक्षंचाश्लेषायांचस्थितेगुरौ ६७ कार्पासाबहवोमंदेभौमेकटकपीडनं
बुधेतिलाश्चमाषाश्चमहर्घावर्षकालतः ६८ सूर्येचसर्वधान्यानिमहर्घाणिभवंतिच शुक्रेचमहतीवर्षासस्यानिसकलानिच २२
६९ मूलेगुरुःकुलित्थानांमुद्गानांबहुधाभवः भौमेमुद्गाश्चमाषाश्चबुधेचसर्वसंपदः ७० पूर्वाषाढागतेभौमेपीडाचपशुप-

क्षिणाम् केतौमहर्घताधान्येपूर्वाषाढागतेभवेत् ७१ उत्तराषाढकेजीवेगुडानांचमहर्घता भौमेचपुष्पजातीनांजायतेचमहर्घ
ता ७२ अभिजिन्नामनक्षत्रेयदाछायासुतोभवेत् सर्वसस्यानिजायंतेसुभिक्षंचकुजेतथा ७३ श्रवणेचयदाजीवस्तदा-
स्युःसर्वसंपदः बुधेत्रासोराजपुत्रेशनौभूरिक्षुसीरिका ७४ कृत्तिकायांचरोहिण्यांयदाजीवोहितिष्ठति मध्यमानिचस-
स्यानितदावृष्टिश्चमध्यमा ७५ आर्द्रायांमृगशीर्षेचयदावाचस्पतिःस्थितः दुर्भिक्षंस्यादनावृष्टिःप्रजानांचसदाऽशिवम् ७६
फाल्गुनीद्वय२हस्तेषुमघायांचयदागुरुः सुभिक्षंचसुवृष्टिश्चप्रजानांस्यादरोगता ७७ चित्रास्वात्योर्यदाजीवस्तदाचित्राः
पयोधराः विचित्राणिभवंत्येवसस्यानिचक्वचित्क्वचित् ७८ विशाखामैत्रयोर्जीवेधान्यंवर्षंचमध्यमम् ज्येष्ठामूलेमासयुग्मं२
वृष्टिर्मासद्वयेनच ७९ पूर्वाषाढोत्तराषाढेस्थितोयदिबृहस्पतिः तदाऽरोग्यंसुभिक्षंचसुवृष्टिश्चप्रजायते ८० अनावृष्टिश्चदु-
र्भिक्षंरेवत्यांसंस्थितेगुरौ धनिष्ठायांचशुक्रेपिपीडाभवतिहस्तिनाम् ८१ इतिश्रीकाशिनाथभट्टाचार्यकृतेशीघ्रबोधेनक्षत्रगु
र्वादिकृतमहर्घप्रकरणंतृतीयम् ३ चूचेचोलाश्विनीप्रोक्तालीलूलेलोभरण्यका आईउएकृत्तिकास्याद्दोवावीवुतुरोहिणी १
वेवोकाकीमृगशिरःकूघङच्छनथार्द्रका केकोहाहिपुनर्वसुहूहेहोडातुपुष्यभम् २ डीडूडेडोतुआश्लेषामामीमूमेमघास्मृ-
ता मोटाटीटूपूर्वफल्गुटेटोपाप्युत्तरंतथा ३ पूषणाठाहस्तनारापेपोरारीतुचित्रका रूरेरोतास्मृतास्वातीतीतूतेतोविशाखका ४

नानीनूनेनुराधार्क्षज्येष्ठानोयायीयूस्मृता येयोभाभीमूलतारापूर्वाषाढाबुधाफडा ५ भेभोजाज्युत्तराषाढाजूजेजोखाभिजिद्वेत् खीखूखेखोश्रवणभंगागीगूगेधनिष्ठिका ६ गोसासीसूशतभिषक्सेसोदादीतुपूर्वभाक् दुझंञंथोत्तराभाद्रादेदोचाचीतुरेवती ७ अश्विनीभरणीकृत्तिकापादंमेषः १ कृत्तिकात्रयःपादारोहिणीमृगशिरार्धंवृषभः २ मृगशिरोत्तरार्धमार्द्रापुनर्वसूत्रयोमिथुनः ३ पुनर्वस्वंत्यपादंपुष्यआश्लेषांतंकर्कटकः ४ मघापूर्वाउत्तरापादंसिंहः ५ उत्तरात्रयःपादाहस्तचित्रार्धंकन्या ६ चित्रोत्तरार्द्धस्वातीविशाखात्रयस्तूलः ७ विशाखांत्यपादानुराधाज्येष्ठांतंवृश्चिकः ८ मूलपूर्वाषाढोत्तराषाढापादंधनुः ९ उत्तराषाढात्रयःपादाश्रवणधनिष्ठार्धंमकरः १० धनिष्ठोत्तरार्द्धंशततारकापूर्वाभाद्रपदात्रयःकुंभः ११ पूर्वाभाद्रपदांत्यपादंउत्तराभाद्रपदारेवत्यंतंमीनः १२ इतिराशिचक्रम् अश्विनी १ भरणी २ कृत्तिका ३ रोहिणी ४ मृग ५ आर्द्रा ६ पुनर्वसू ७ पुष्य ८ आश्लेषा ९ मघा १० पूर्वाफाल्गुनी ११ उत्तराफाल्गुनी १२ हस्त १३ चित्रा १४ स्वाती १५ विशाखा १६ अनुराधा १७ ज्येष्ठा १८ मूळ १९ पूर्वाषाढा २० उत्तराषाढा २१ अभिजित् २२ श्रवण २३ धनिष्ठा २४ शततारका २५ पूर्वाभाद्रपदा २६ उत्तराभाद्रपदा २७ रेवती २८ इत्यष्टाविंशतिनक्षत्राणि आलामेष १ ऊवावृषा २ काच्छामिथुन ३ डाहाकर्क ४ माटासिंह ५ पाठाकन्या ६ रातातूळ ७ नाजावृश्चिक ८ भाधाधन ९ जाखामकर १० गोसाकुंभ ११ दाचाझथमीन १२ इतिद्वादशराशिचक्रम् सप्तविंशतिभानांचनवभिर्नव २३

भिः पदैः अश्विनीमुखानांचमेषाद्याराशयःस्मृताः १३ मेषो १ वृषोथ २ मिथुनं ३ कर्कः ४ सिंहश्च ५ कन्यका ६ तुला ७ वृश्चिक ८ चापश्च ९ मकरः १० कुंभ ११ मीनको १२ । १४ इतिद्वादशराशयः तनु १ धन २ भ्रातृ ३ बंधु ४ पुत्र ५ शत्रु ६ कलत्रकाः ७ मरणं ८ ध-

मे	वृ	मि	क	सिं	क	तू	वृ	ध	म	कुं	मी
चू	ई	का	हि	मा	टो	रा	तो	ये	भो	गु	दी
चे	उ	कि	हु	मी	पा	री	ना	यो	जा	गे	दू
चो	ए	कू	हे	मू	पी	रू	नि	भा	जी	गो	श
ला	वो	घ	हो	मे	पू	रे	नू	भी	खी	सा	झ
ली	वा	ङ	डा	मो	ष	रो	ने	भू	खू	सी	थ
लू	वि	छ	डी	टा	ण	ता	नो	धा	खे	सू	दे
ले	वू	के	डु	टि	ठ	ति	या	फा	खो	से	दो
लो	वे	को	डे	टु	पे	तु	यी	ढा	गा	सो	चा
आ	वो	हा	डो	टे	पो	ते	यू	भे	गी	दा	ची

३	१०	वि	श्वा	५
९	५	वि	श्वा	१०
८	४	वि	श्वा	१५
७	०	वि	श्वा	२०

३	१०	श	वि	श्वा	२०
९	५	वृ	वि	श्वा	२०
४	८	मे	विं	श्वा	२०

र्म ९ कर्म १० प ११ व्यय १२ द्वादशराशयः १५ तृतीये ३ दशमे १० पंच ५ नवमे ९ पंचमे ५ दश १० दशपंचा १५ ष्टमे ८ तुर्ये ४ सप्तमे ७ विंशतिस्तथा २० । १६ विश्वारूपग्रहदृष्टीनामेषुस्थानेषुरूपिताः आये ११ व्यये १२ धने ९ लग्ने १ षष्ठेच ६ ग्रहदृष्टयः १७ इतिसामान्यदृष्टिः तृतीये ३ दशमे १० मंदोनवमे ९ पंचमे ५ गुरुः विंशतिं २० वीक्षतेविश्वान्चतुर्थे ४ चाष्टमे ८ कुजः १८ इतिविशेषदृष्टिः रविवारेणसंयुक्तायदास्यात्पौषज्येष्ठयोः अमावास्यातदापृथ्वीरुंडमुंडाचजायते १९ अयनादिकवासररामहतागगनानलबाणशशांकयुता प्रतिभाजितशून्यर ८

सैर्धघटिकामकरादिदिनेकर्कादिनिशा २० अयनात्रिगुणामासा३ एकपंचदशान्विता१५ दलिताघटिकाज्ञेयाः पलास्त्रिगुण
वासराः २१ इतिदिनमानंवाराणस्याम् अयनगयादिनदशामिलेवा वीशेभागविचक्षणदेवा लब्धअंकपन्चावीसमिलेवा
पलत्रिगुणादिनमानलहेवा ग्रंथांतरेइतिदिनमानम् एकपक्षेयदायांतितिथयश्चत्रयोदश१३ त्रयस्तदाक्षयंयांतिवाजिनोभ
जुजागजाः २२ सूर्ययुक्तान्चनक्षत्राद्द्याद्विज्ञस्त्रयंत्रयं३ आदित्यश्चबुधः१।२शुक्रः३शनि४श्चंद्रः५कुजस्तथा६।२३जीवो
७राहुश्च ८ केतुश्च९होमेक्रूरानशोभनाः आदित्येन्चभवेच्छोकोबुधेसंपतिरुत्तमा २४ शुक्रेस्यान्चधनप्राप्तिः शनौपीडान्च-
जायते चंद्रेभवतिलाभश्चभौमेन्चवधबंधनम् २५ गुरौन्चधनधान्यंस्याद्राहुःस्यान्मृत्युदःखलु केतौन्चप्राणसंदेहोवह्निच
क्रमुदाहृतम् २६ शुभग्रहार्कवारेषुमृदुक्षिप्रध्रुवेषुच शुभराशिविलग्नेषुशुभंशांतिकपौष्टिकं २७ इतिसंकीर्णवह्नि-

र	चं	मं	बु	गु	शु	श	रा	केतु
३	३	३	३	३	३	३	३	३

चक्रम् दार्केंद्रकालः पृथगाकृतिघ्नःशशांकनंदाश्वियुगैः ४२ ९१ समेतः शराद्रिवस्विंदु
१८ ७५ हृतः सलब्धः पष्ट्याप्त ६० शेषेप्रभवादयोब्दाः १ प्रभवो१ विभवः २शुक्लः३प्रमो
दो४थप्रजापतिः ५ अंगिराः ६श्रीमुखो७ भावो ८ युवा९ धाता१० तथेश्वरः ११।२८ बहु
धान्यः१२प्रमाथीच१३विक्रमो१४ वृषभस्तथा१५ चित्रभानुः १६ शुभानुश्च१७ तारणः१८ पार्थिवो१९ व्ययः २०।२९ ब्रह्मणो

विंशतिश्चैनेसृष्टिरत्रप्रजायते सर्वजित्१ सर्वधारीच२ विरोधी३ विकृति४ स्तथा ३०खरो ५ नंदन नामाच ६ विजयश्च ७ जयो ८
परः मन्मथो९ दुर्मुखश्चान्यो१० हेमलंब११ विलंबको१२।३१ विकारी१३ शार्वरीचान्यः १४ प्लवश्च१५ शुभकृत्तथा१६ शोभन-
श्च१७ तथाक्रोधी१८ विश्वावसु१९ स्तथापरः ३२ पराभवाख्योह्यपरो२० विष्णोरेतेच्चविंशतिः प्लवंगः १ कीलकः २ सौम्य३
स्तथासाधारणोपरः ४। ३३ विरोधकृत्समाख्यातः ५ परिधावी ६ प्रमाथ्यपि७ आनंदो ८ राक्षस९ श्चाथानलश्च१० पिंगल
स्तथा११ ३४ कालः १२ सिद्धार्थि१३ रौद्रोच१४ दुर्मति१५ दुंदुभिस्तथा१६ अपरोरुधिरोद्गारी१७ रक्ताक्षः १८ क्रोधनस्तथा
१९ क्षयकृद्वत्सरश्चान्यो२० रुद्रस्यामीचविंशतिः ६० वत्सराः षष्टिराख्यातानामतुल्यफलप्रदाः ३६ इतिसंवत्सरनामा-
नि मेष१ वृश्चिक ८ योर्भौमः शुक्रोवृष२ तुला७ भृगुः बुधः कन्या६ मिथुने३ प्रोक्तोकर्कस्य४ पतिचंद्रमाः ३७ स्यान्मीन१२
धनुषो९ र्जीवः शनिर्मकर१० कुंभयोः ११ सिंहस्या५ धिपतिः सूर्यः कथितागणकोत्तमैः ३८ इतिराश्याधिपतयः कन्याराः
हुग्रहंप्रोक्तंराहूच्चंमिथुनंस्मृतम् राहोर्नीचंधनुर्वेदिकशनिवदस्यच ३९ रवौमेषतुलेप्रोक्ते १।७ चंद्रस्यवृष२ वृश्चिकौ ८
भौमस्यमृगकर्कौच१०।४ कन्या६ मीनो१२ बुधस्यच ४० जीवस्यकर्क४ मकरौ१० मीनः १२ कन्या६ सितस्यच तुलामेषश्च ७
१ मंदस्यउच्चंनीचमुदाहृतम् ४१ इतिग्रहाणामुच्चनीचानिमासंशुक्रबुधादित्या१ श्चंद्रस्यार्द्धदिनद्वयम्२॥ भौमास्त्रिपक्षं

र	चं	मं	बु	गु	शु	श	रा
५	४	१	६	१२	२	१०	६
०	०	८	३	९	७	११	१

१॥ जीवोब्दं १२ मासंचरतिवैभृगुः ४२ शनिर्वर्षद्वयंसार्द्धं २॥ राशावेकत्रतिष्ठति राहुःकेतुःसदाभुंक्तेसार्द्धमेकंतुवत्सरम् १॥ ४३ इतिग्रहाणांराशिस्थितिः कार्तिकादिगु-

र	चं	मं	बु	गु	शु	श	रा	के
१	२	१०	६	४	१२	७	६	उ
७	८	४	१२	१०	६	१	३	नी

णामासागताभिस्तिथिभिर्युताः सप्तविंशतिभिर्युक्तादिनतारैकसंयुताः ४४ इतिनक्षत्रज्ञानम् दोहा मासगयाजे-
दीहडातिसमेंदुन्निहरिज्ञ मासैनामनक्षगणिन्योयसीचंदकहिज्ञ इतिचंद्रमाग्यानम् ग्रंथांतरे सार्धोष्टमासो ८॥ भृगु-
पूर्वभागेअस्तंगतेतिष्ठतिपंचपक्षैः २॥ यश्चोदयोमासनवान्भुक्त्वा ९ शुक्रोदशाहेउदितेचपूर्वे १ सार्द्धाष्टमासा ८॥ पूर्वस्मि-
न्नुदितेदृश्यतेभृगुः सार्द्धमासद्वयं २॥ पूर्वमंडलेचतन्नोवसेत् ४६ एकग्रामेपुरेवापिदुर्भिक्षेराजविग्रहे विवाहेतीर्थयात्रायां
शुक्रदोषोनविद्यते ४७ इतिशुक्रस्थितिः दशार्द्राद्याःस्त्रियस्तारा १० विशाखाद्यानपुंसकाः तिस्रःस्त्रियश्चमूलाद्याःपुरु
षास्तुश्चतुर्दश १४ ४८ स्त्रीपुंसयोर्महावृष्टिः स्त्रीनपुंसकयोःक्वचित् स्त्रीस्त्रियोःशीतलाच्छायायोगेपुरुषयोर्नच ४९ उद-
यास्तमितःशुक्रोबुधश्चवृष्टिकारकौ जलराशिस्थितश्चंद्रः पक्षांतेसंक्रमेतथा ५० बुधशुक्रसमीपस्थःकरोत्येकार्णवांमहीं
तयोरंतर्गतोभानुः समुद्रमपिशोषयेत् ५१ चलत्यंगारकोवृष्टिस्त्रिधावृष्टिःशनैश्चरे वारिपूर्णांमहींकृत्वापश्चात्संचरतेगुरुः

५२ भानोरग्रेभूमिपुत्रेजलशोषःप्रजायते भानोःपश्चाद्भूमिपुत्रोवृष्टिर्भवतिभूयसी ५३ कर्के ४ कुंभेच ११ सिंहेच ५ मकरेच-
११ दिवाकरे पूर्ववापश्चिमेवापिद्वारंकुर्याच्चवेश्मनः ५४ मेषे १ वृषे २ वृश्चिकेच ८ तुलेवापिदिवाकरः गृहद्वारंतथाकुर्यादुत्त
रंवाथदक्षिणाम् ५५ धनु ९ र्मिथुन ३ कन्यायां ६ मीनेच १२ यदिभानुमान् नकर्तव्यंतदागेहकृत्तदुःखमवाप्यते ५६ इतिवा-
स्तुकर्मविधिः यदैकमासे १ ग्रहणंजायतेशशिसूर्ययोः शस्त्रकोपैःक्षयंयांतिनदाभूपाःपरस्परं ५७ ग्रस्तोदितौचग्रस्तास्तौ
धान्यभूपालनाशकौ सर्वग्रस्तौचंद्रसूर्यौदुर्भिक्षमरणप्रदौ ५८ इतिग्रहणफलम् उपरागेयदामेषे १ पीड्यंतेचतदाजनाः
कांबोजांध्रकिरातांश्चपांचालाश्चकलिंगकाः ५९ वृषेच २ ग्रहणेगोपाःपशवःपथिकाजनाः महांतोमनुजायेचपीड्यंतेचापि
सर्वदा ६० रविचंद्रमसोर्ग्रासेमिथुनेचवरांगनाः पीड्यंतेबाल्हिकामत्स्यायमुनानटवासिनः ६१ कर्केच ग्रहणेपीडामल्लादी-
नांचजायते आभीरशबराणांचतथामत्स्यनिवासिनाम् ६२ सिंहेच ५ ग्रहणेपीडासर्वेषांवनवासिनाम् नृपाणांनृपतुल्यानां
मनुजानांचजायते ६३ कन्यायां ६ ग्रहणेपीडात्रिपुराणांचशालिनाम् कवीनांलेखकानांगुणकानांचजायते ६४ तुलाया ७
मुपरागेचदशार्णवंगकांध्रकाः मरुदेशाःपरात्याश्चपीड्यंतेसाधवश्चये ६५ वृश्चिके ८ ग्रहणेपीडासर्पजातौचजायते उदुंब
रस्यमद्रस्यचोलयौधेयकस्यच ६६ यदापरागश्चापे च ९ तदामत्स्याश्चवाजिनः विदेहमल्लपांचालापीड्यंतेभिषजोविशः ६७

मकरे१० ग्रहणेपीडानीचानांमंत्रवादिनाम् स्थविराणांचभद्रानांचित्रकूटस्यसंक्षयः ६८ कुंभो११ परागेपीड्यंतेगिरिजाःप
श्चिमाजनाः तस्करादरदाभीरादेशाबर्बरकादयः ६९ मीनोपरागे१२ पीड्यंतेजलद्रव्याणिसागराः जलेयेजीविनोलोकायेच-
प्राज्ञास्तथानराः ७० इतिमेषादिराशिषुसूर्यचंद्रमसोर्ग्रहणफलम् क्षयकृत्पांसुवृष्टिश्चनीहारश्चभयंकरः विद्युत्पा-
तोग्निदायीचपरिवेषश्चरोषकृत् ७१ दिग्दाहोग्निभयंकुर्यान्निर्घातोनृपभीतिदः झंझावायुश्चंडशब्दोचोरभीतिप्रदा
यको ७२ गृहयुद्धंराजयुद्धंकेतौदृष्टेतथैवच ग्रहणांतेतथावृष्टिः सर्वदोषविनाशिनी ७३ इतिधूलिवर्षा अश्विन्यामुदि
तः केतुर्हन्यादश्मकपालकौ भरण्यांचकिरातेशंकृत्तिकायांकलिंगकम् ७४ रोहिण्यांशूरसेनेशंमृगेचोशीनराधिपम्
आर्द्रायांजलजाधीशमश्मकेशंपुनर्वसौ ७५ पुष्येचमगधाधीशंसार्पेचकाशिकाधिपम् मघायामंगनाथंचपूर्वायांपांडु
नायकम् ७६ उज्जयिन्यांनृपहन्यादुत्तराफाल्गुनीगतः दंडकाधिपतिंहस्तेविषयान्कुरुभूमिपं ७७ स्वातौकाश्मीर-
कांबोजभूपतीनांविनाशकः ७८ मैत्रेयंध्रस्यनाथंचसार्वभौमंतथेंद्रिके अंध्रमद्रकनाथौचमूलस्यहंतिनिश्चितम् ७९
पूर्वाषाढेकाशिराजमुत्तराषाढकेतथा यौधेयशिवचैद्येशंश्रवणेकेकयेश्वरम् ८० वसौपंचनदाधीशंवारुणेसिंहलेश्वरं २६
पूर्वाभाद्रपदेत्वांगंनैमिषेशंतथोत्तरे ८१ रेवत्यामुदितः केतुः किराताधिपतिर्बुधः धूम्राकारः सपुच्छश्चकेतुर्विश्वस्यपी-

डकः ८२ इतिकेतूदयफलम् भानुभौमार्किवारेचेत्कार्तिकेंदुक्षयोभवेत् ३० आयुष्मान्स्वस्तिसंयुक्तोनृपनाशःप्रजा
क्षयः ८३ इतिदिनमालिका सेवाचक्रेसप्तमौलौ७ पृष्ठेसप्तच ७ तारकाः कुक्षौसप्त ७ पदेसप्त ७ लिखेदभिजितासह
८४ स्वामिभाड्भृत्यभंगण्यंभृत्यभात्स्वामिभंतथा सफलंमस्तकेकुक्षौनिष्फलंपादपृष्ठयोः ८५ इतिसेवाचक्रम् धनुर्मृगौ
च९।१० मेषाद्या १ चत्वारस्युर्निशाबलाः ४ तेविनामिथुनंपंच ५ ज्ञेयाः पृष्ठोदयाबुधैः ८६ शीर्षोदयाश्चचत्वारः ४ सिंहाद्याः
५ कुंभएवच दिवाबलाश्चमीनश्च१२ बलीरात्रौतथादिने ८७ मेषाद्याश्चचचत्वारः ४ सधन्विमकराधिपः ९।१० बलाज्ञेयाः
पृष्ठोदयाविसुखनासिरसान्येद्युभयातोमीनः १२ ८८ ग्रंथांतरे तद्वर्षंद्विगुणीकृत्य२ रामहीनंतुकारयेत् मुनिभिश्चहरेद्भा
गं७ शेषांकेनफलंवदेत् ८९ चंद्रे१ वेदे४ चदुर्भिक्षंसुभिक्षंयुग्मबाणयोः २।५ रामे३ रसे६ मध्यमंचशून्येशून्यंप्रकीर्तित
म् ९० अतिचारेगतेसौम्येक्रूरेवक्रेत्वमागतिः हाहाभूतंजगत्सर्वंरुंडमुंडंप्रजायते ९१ मंत्रस्वीकरणंचैत्रेबहुदुःखभय
प्रदम् वैशाखेरत्नलाभश्चज्येष्ठेचमरणंध्रुवम् ९२ आषाढेबंधुनाशश्चश्रावणेचशुभावहम् प्रजाहानिर्भाद्रपदेसर्वत्रसु-
खमाश्विने ९३ कार्तिकेसुखवृद्धिः स्यान्मार्गशीर्षेशुभप्रदम् पौषेतुज्ञानहानिः स्यान्माघेमेधाविवर्द्धनम् ९४ फाल्गुनेसर्व-
सौभाग्यमाचार्यैः परिकीर्तितम् इतिग्रहाणांवक्रफलम् मंत्रारंभोरवौशुक्रेबुधेजीवेप्रशस्यते शनौमृत्युक्षयंभौमेन

वतिर्निः फलप्रदा ९५ अश्विनीश्रवणस्वातीविशाखापुष्यरोहिणी ज्येष्ठाकरधनिष्ठायांकु-
र्यान्मंत्राभिषेचनम् ९६ इतिमंत्रारंभः इतिश्रीकाशीनाथभट्टाचार्यकृतेशीघ्रबोधेसंवत्स-
रप्रकरणंसमाप्तम् चतुर्थप्रकरणम् ४ ५ ५ ५ ५ ५

अथग्रहणफलज्ञानार्थंराहुचारोलिख्यते तदेवचंद्रार्कयोर्ग्रहणम् तत्कृतत्वात् तत्रादौपर्वेश
फलमाह ब्राह्म्येक्षेमांबुसौम्येतदपिजलहृतिर्युद्धमैंद्रेकुबेरेर्थोनश्येद्वारुणेक्ष्मापतिहृतिरनले
शर्मयाम्येंबुभीः क्षुत् वेलोनेगर्भहोर्ध्वेफलहृदिनविधप्रग्रहश्चैकमासेस्त्रंग्रस्तास्तोदितेन्नाक्षि
तिपहृदखिलग्रासकेग्निर्मृतिःक्षुत् १ षड्भिःखभैः सवनमासगणादित्यादिनाग्रहकौतुके आ
चार्येणपर्वेशउक्तः ब्रह्मणः इदंब्राह्म्यं तस्मिन्ब्राह्म्ये पर्वणिब्रह्मणिपर्वेशेसतिक्षेमंआरोग्यादि
अंबुजलंस्यात् सोमस्येदंसौम्यंतस्मिन् चंद्रेपर्वेशेसतितदपिक्षेमांबुजलहृतिश्चस्यात् ऐंद्रेपर्वणि इंद्रेपर्वेशेसतियुद्धम् कुबे
रेपर्वेशेसतिअर्थोधनंनश्येत् वारुणेपर्वणिक्ष्मापतिहानिः राजनाशः अनलेअग्नौपर्वेशेसतिशर्मसुखम् याम्येपर्वणि अंबु

भीः जलभयम् क्षुत्दुर्भिक्षंच अथहीनातिरिक्तकालफलमाह वेलोनेइति वेलोनेग्रहणेसतिगर्भहागर्भनाशः राहुरितिव
क्ष्यमाणोत्रसंबध्यतेऊर्ध्वेवेलाधिकेसतिफलहृत् फलानिदाडिमादीनिधान्यादीनिचनानिहंतीतितथा अत्रवेलाशब्देनया
मार्द्धंगृह्यते वेलामानंचयामार्द्धमित्युक्तेः स्फुटगणितविद्भिरादिष्टकालात् कदाचिदपिविकृतिवशेनवेलामात्रमूनमधि-
कंवाग्रहणंस्यात्तदेदंफलंवाच्यंवेलाशब्देनकालमात्रेतूच्यमानेप्राणमात्रन्यूनाधिकोप्यनत्प्रसंगः नचैतत्ज्ञातुंशक्यम् प्रत्य
क्षेणसूक्ष्मकालानाकलनात् अतोयदुक्तंतत्सत् अथैकमासेचंद्रार्कग्रहणयोः फलमाह इनविधुरिति इनविध्वोः रविचंद्र
योः प्रग्रहः ग्रहणंएकमासेचेत्स्यात्तदा अस्त्रशस्त्रपीडास्यात् एतत्सत्यधिमासे एकमासइत्युक्तत्वात् षष्टिभिर्दिवसैर्मा-
सः कथितोबादरायणेरित्युक्तेः अधिमासजातग्रहणात् शुद्धमासेन्यस्मिन् ग्रहणेसतीत्यर्थः अन्यथा अथसदिनजातइति
वक्ष्यमाणफलस्यपौनरुक्त्यापत्तेः अथग्रस्तास्तोदितफलमाह ग्रस्तास्तोदितेइति ग्रस्तश्चासौअस्तोदितश्चतस्मिन् ग्रस्ता-
स्तेग्रस्तोदितेच अन्नक्षितिपहृत् धान्यापहारीराजापहारीस्यात् राहुरितिवक्ष्यमाणः कर्त्ता अथसर्वग्रासफलमाह अ-
खिलइति अखिलग्रासकेचंद्रार्कयोः सर्वग्रासेसति अग्निः मृतिः क्षुत्दुर्भिक्षंचस्यात् १ अथायनफलमाह द्वौद्वौवर्णौ
क्रमाद्दत्यगुरुदगयनान्म्लेच्छयातॄन्विदिकस्थः सौम्याद्वर्णौश्चयाम्याद्गजकृषिकरगाः सव्यमैंद्यांसुवृष्टिः शैलेस्वांशेर्ग्रहे

विप्रबहुगुणमगुः क्षत्रवैश्यांश्चशूद्रान् भूभृन्मध्यान्पशूंस्त्रीनिवहमपहरेच्चोरमेषांत्यसत्सन् २ उदगयनात् उदगयनमारभ्यक्रमात् द्वौद्वौवर्णौअगुःसहुः हंति उत्तरायणेविप्रक्षत्रियौ दक्षिणायनेवैश्यशूद्रावित्यर्थः अथस्पर्शफलमाह म्लेच्छयातॄनिति विदिकस्थः विदिशिदृष्टोराहुः म्लेच्छान् यातॄन् यायिनश्चहंति सौम्यात् उत्तरमारभ्यदृष्टोराहुः क्रमेणसव्यांविप्रादीन्वर्णान्हंति उत्तरेविप्रान् पूर्वेक्षत्रियान् दक्षिणेवैश्यान् पश्चिमेशूद्रानित्यर्थः याम्याद्दक्षिणमारभ्यसव्यंगजकृपिकरगाः हंति दक्षिणेगजान् पश्चिमेकृषिकरान् उत्तरेगाः पशूनित्यर्थः ऐंद्र्यांपूर्वस्यांसुवृष्टिःस्यात् अथखंशफलमाह तत्रादौस्पर्शे शैलैः खांशैरिति शैलैः सप्तभिः खांशैः आकाशभागैः ग्रहेस्पर्शेविप्रबहुगणादीन् अगुः राहुः अपहरेत् पीडयेत् एतदुक्तंभवति रविग्रहेद्युमानंचंद्रग्रहेरात्रिमानंसप्तधाविभज्यतत्रप्रथमेंशेस्पर्शेजातेविप्रान् बहुगुणांश्चराहुः पीडयति द्वितीयेक्षत्रियान् तृतीयेवैश्यान् चतुर्थेशूद्रान् भूभृतः राज्ञः मध्यान् मध्यदेशीयांश्च पंचमेपशून् षष्ठेस्त्रीनिवहंस्त्रीसमूहं सप्तमेचोरमिति अथमोक्षेखंशफलमाह एषांत्यजन्निति त्यजन्चंद्रार्काविति शेषः चंद्रार्कौमोक्षन्राहुः एषांविप्रबहुगुणादीनांसत्शुभःस्यात् प्रथमखंशेमोक्षोयदितदाविप्रबहुगुणानांशुभंस्यादित्यर्थः एवंद्वितीयादावपि २ अथमासफलमाह काशीहोर्जेसुभिक्षंसजलसदपरेविप्रहाक्षुच्चपौषेकाशीहास्वंबुमाघेंगसुखहृद्

परेपौंड्रहाकांबुचैत्रे सौभिक्षंस्याच्चराधेथनृपतिजलहाक्कांबुकाश्मीरहाशात्स्वन्नंकाश्मीरहोर्ध्वेन्नबहुलमपरेपौंड्रहेपेसदन्नं ३ ऊर्जेकार्तिकेग्रहणेसतिराहुः काशीहाकाशीदेशहंतास्यात् अपरेमार्गशीर्षेसुभिक्षं सुजलंबहुजलं सत् क्षेमं पौषेविप्रहाब्राह्मणहंतास्यात् क्षुत् दुर्भिक्षंच माघेकाशीहाकाशीदेशहंतास्यात् स्वंबुसुजलंच अपरेफाल्गुने अंगसुखहृत् अंगादिदेशपीडकः चैत्रेपौंड्रहापौंड्रदेशहंता कांबुक्वचिदंबुखंडेखंडेवृष्टिरिति राधेवैशाखेसौभिक्ष्यं अथतदनंतरंज्येष्ठेमासेइत्यर्थः नृपतिजलहाराजहंताजलहंताचेति अस्मादनंतरंआषाढेकांबुखंडेखंडेवृष्टिः काश्मीरहाकाश्मीरदेशहंता ऊर्ध्वेतदूर्ध्वेश्रावणेस्वन्नंबहुधान्यं काश्मीरहाकाश्मीरदेशहंता अपरेभाद्रपदे अन्नेनबहुलं अन्नेबहुलं यथास्यात्तथेति इषेआश्विनेपौंड्रहापौंड्रदेशहंता सदन्नंबहुधान्यं ३ अथराशिफलमाह पांचालोंड्रादिहाजेगविचसुरभिहोर्ध्वेकुभृद्यामुनघ्नोन्नाभीरघ्नःकुलीरेथनृपवनगहासस्यकाव्यज्ञहोर्ध्वे वाणिक्कावंत्यहोर्ध्वेलिम्निनरपतिहोर्ध्वेस्वपांचालविद्वानक्रेमंत्र्यायुधिघ्नोत्यपरदरदहोर्ध्वेझषेम्मोधिगघ्नः ४ अजेमेषेग्रहणेसतिराहुः पांचालोंड्रादिहास्यात् पांचालाः पांचालदेशीयाः उंड्राःउंड्रदेशीयाः आदिशब्देन कलिंगशूरसेनकांबाजादीनांग्रहणं तेषांहंता गविवृषभेसुरभिहागवांहंता तत्पालकादीनांच ऊर्ध्वेमिथुनेकुभृद्यामुनघ्नः कुभृतोराजानः यामुनाः यमुनादेशीयाः तेषांहंता कुलीरेकर्कटे अन्नाभीर

घ्नः अन्नंधान्यं आभीराः आभीरदेशीयाः तेषांहंता अथतदनंतरंसिंहेइत्यर्थः नृपाः राजानः वनगाः वनचराः तेषां
हंता ऊर्ध्वेकन्याराशौसस्यकाव्यज्ञहा सस्यानिपश्चाद्धान्यानि काव्यज्ञाः काव्यवेत्तारः तेषांहंता ऊर्ध्वेतौलिनिवाणि
क्कावंत्यहा वणिजएववाणिक्काः आवंत्याः अवंतीदेशीयाः एषांहंता अलिनिवृश्चिकेनरपतिर्हाराजहंता ऊर्ध्वेधनुर्धरे-
अश्वपांचालविद्रा अश्वारूरगाः पांचालाः पांचालदेशीयाः विशोवैश्याः तेषांहंता नक्रेमकरे मंत्र्यायुधिघ्नः मंत्रि-
णोमंत्रज्ञाः आयुधेजीवंतितेआयुधिनः तेषांहंता ऊर्ध्वेकुंभेअपराः पश्चिमदेशीयाः दरदाः दरददेशीयाः तेषांहं-
ता झषेमीने अंभोधिगाः समुद्रगामिनः तेषांहंता ४ अथभ्रमणफलमाह सव्येतेगोसुभिक्षमभयमितरथाद्या-
त्स्ववर्णासिताद्येहारिद्रेश्यामलेरुक्शिखिनिचहरितेपाटलेग्न्याभदीप्ते क्षुत्पीतेकापिलेथासदखिलखगदृक्चेन्न
जैव्यद्रुहाधोभीरिष्टैर्दुष्टहत्स्वेब्रथसदिनजनोब्जस्यपक्षेन्यथान ५ सव्यंइनः सव्येनः तस्मिन्सव्येनेअगौराहौसतिसु
भिक्षंस्यात् इतरथाअपसव्यगतेभयंप्रकृष्टभयंराजतस्करादीनांभयं अथवर्णफलमाह अद्यात्स्ववर्णमिति सि
ताद्येशुक्लरक्तपीतकृष्णावर्णेक्रमेणस्ववर्णांविप्रक्षत्रियवैश्यशूद्रान् अद्याद्भक्षयेत् हंतीत्यर्थः हारिद्रेहरिद्रावर्णेश्या
मलेश्यामवर्णे शिखिनिचार्चिष्मतिहरितेहरिद्वर्णेपाटलेपाटलवर्णे अग्न्याभदीप्तेअग्निरिव आभातीति अग्न्या- २९

भः सचासौदीप्तश्चतस्मिन् अग्निरिवदीप्तेचरुक्रोगःस्यात् पीतेपीतवर्णेकापिलेकपिलवर्णेक्षुत्दुर्भिक्षंस्यात् अथदृ-
ष्टिफलं अथासदिति अखिलखगदृक् अखिलानांभौमादीनांगुरुव्यतिरिक्तानांदृक् दृष्टिश्चेत्तदा असत् अशुभंस्यात्
चेज्जैर्वाजीवस्येयजैवीदृकचन्नस्यात् अर्थाद्गुरुदृष्टिवशात् अन्येषांदृष्टिजमशुभफलंशुभंस्यादिति अथग्रहणानंतरं-
सप्तदिनमध्यस्थानांनिमित्तानां फलमाह अन्यहेति अब्धहाधः ग्रहणात्सप्तदिनादर्वाक् दृष्टैरिष्टैरारिष्टैर्दिव्यभौमांतरि
क्षैर्भीः भयंस्यात् स्वेबुसुष्टुअब्रुअविकृतजलंदुष्टहृत् ग्रहणदुष्टफलनाशकंस्यात् अथपक्षांतरितग्रहणफलमाह
अथसदिति इनजनः रविजात्ग्रहणात्पक्षेपक्षांतेअब्जस्यचंद्रस्यग्रहणेजातेसतिसत्शुभंस्यात् अन्यथाचंद्रग्रहणा-
नंतरंपक्षांतेरविग्रहणेजातेसतिनशुभंस्यात् एषांपर्वेशादिफलानांपटलेखनेसद्यः स्मरणार्थंआचार्येणपाठोनिबद्धः प-
र्वेशायनमासराशिभनभौंशैः षड्विधंकालतः स्पर्शग्रासविमोक्षवर्णजनितंबिंबाच्चतुर्धाफलं खेटालोकनजंग्रहग्रहभवंप
क्षांतरस्थंग्रहंत्रेधेवंसतिसंभवेत्वनियतंनैमित्तिकंचादिशेत्इति अत्रदशविधमोक्षग्रासानांफलमाचार्येणनोक्तंदुर्लक्ष्य-
त्वात् तथाचनारदः दशैवग्रासभेदांश्चमोक्षभेदांस्तथादश अशक्तालक्षितुंदेवाः किंपुनः प्राकृतोजनइति ५ इतिराहु-
चारः ५ ॥ समाप्तम् हेंपुस्तकमुंबईंतबापूहरशेटदेवळेकरयांणींआपल्याछापखान्यांतछापिलें शके १७८१ ॥

इतिशीघ्रबोधसमाप्त.